श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये निदानस्थानम्।

प्रथमः+अध्यायः।

अथ+अतः सर्वरोगनिदानं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

रोगः पाप्मा ज्वरः+ व्याधिः+विकारः+ दुःखम्+आमयः।

यक्ष्मातङ्कगदाबाधाः शब्दाः पर्यायवाचिनः॥1॥

निदानं पूर्वरूपाणि रूपाण्युपशयः+तथा।

सम्प्राप्तिः+च+इति विज्ञानं रोगाणां पञ्चधा स्मृतम्॥2॥

निमित्तहेत्वायतनप्रत्ययोत्थानकारणैः।

निदानम्+आहुः पर्यायैः प्राग्रूपं येन लक्ष्यते॥3॥

उत्पित्सुः+आमयः+ दोषविशेषेण+अनधिष्ठितः।

लिङ्गम्+अव्यक्तम्+अल्पत्वात्+व्याधीनां तत्+यथायथम्॥4॥

तत्+एव व्यक्ततां यातं रूपम्+इति+अभिधीयते।

संस्थानं व्यञ्जनं लिङ्गं लक्षणं चिह्नम्+आकृतिः॥5॥

हेतुव्याधिविपर्यस्तविपर्यस्तार्थकारिणाम्।

औषधान्नविहाराणाम्+उपयोगं सुखावहम्॥6॥

विद्यात्+उपशयं व्याधेः सः+ हि सात्म्यम्+इति स्मृतः।

विपरीतः+अनुपशयः+ व्याध्यसात्म्याभिसंज्ञितः॥7॥

यथादुष्टेन दोषेण यथा च+अनुविसर्पता।

निर्वृत्तिः+आमयस्य+असौ सम्प्राप्तिः+जातिरागतिः॥8॥

सङ्ख्याविकल्पप्राधान्यबलकालविशेषतः।

सा भिद्यते, यथा+अत्र+एव वक्ष्यन्ते+अष्टौ ज्वरा इति॥9॥

दोषाणां समवेतानां विकल्पः+अंशांशकल्पना।

स्वातन्त्र्यपारतन्त्र्याभ्यां व्याधेः प्राधान्यम्+आदिशेत्॥10॥

हेत्वादिकात्स्न्यावयवैः+बलाबलविशेषणम्।

नक्तंदिनर्तुभुक्तांशैः+व्याधिकालः+ यथामलम्॥11॥

इति प्रोक्तः+ निदानार्थः तं व्यासेन+उपदेक्ष्यति।

सर्वेषाम्+एव रोगाणां निदानं कुपिता मलाः॥12॥

तत्+प्रकोपस्य तु प्रोक्तं विविधाहितसेवनम्।

अहितं त्रिविधः+ योगः+त्रयाणां प्राक्+उदाहृतः॥13॥

तिक्तोषणकषायाल्परूक्षप्रमितभोजनैः।

धारणोदीरणनिशाजागरात्युच्चभाषणैः॥14॥

क्रियातियोगभीशोकचिन्ताव्यायाममैथुनैः।
ग्रीष्माहोरात्रिभुक्तान्ते प्रकुप्यति समीरणः॥15॥
पित्तं कट्वम्लतीक्ष्णोष्णपटुक्रोधविदाहिभिः।
शरन्मध्याह्नरात्र्यर्धविदाहसमयेषु च॥16॥
स्वाद्वम्ललवणस्निग्धगुर्वभिष्यन्दिशीतलैः।
आस्यास्वप्नसुखाजीर्णदिवास्वप्नातिबृंहणैः॥17॥
प्रच्छर्दनाद्ययोगेन भुक्तमात्रवसन्तयोः।
पूर्वाह्णे पूर्वरात्रे च श्लेष्मा द्वन्द्वं तु सङ्करात्॥18॥
मिश्रीभावात्+समस्तानां सन्निपातः+तथा पुनः।
सङ्कीर्णाजीर्णविषमविरुद्धाध्यशनादिभिः॥19॥
व्यापन्नमद्यपानीयशुष्कशाकाममूलकैः।
पिण्याकमृद्यवसुरापूतिशुष्ककृशामिषैः॥20॥
दोषत्रयकरैः+तैः+तैः+तथा+अन्नपरिवर्तनात्।
ऋतोः+दुष्टात्+पुरोवातात्+ग्रहावेशात्+विषात्+गरात्।21॥
दुष्टान्नात् पर्वताश्लेषात्+ग्रहैः+जन्मर्क्षपीडनात्।
मिथ्यायोगात्+च विविधात्+पापानां च निषेवणात्॥22॥
स्त्रीणां प्रसववैषम्यात्+तथा मिथ्योपचारतः।
प्रतिरोगम्+इति क्रुद्धा रोगाधिष्ठानगामिनीः॥23॥
रसायनीः प्रपद्य+आशु दोषा देहे विकुर्वते॥23 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने सर्वरोगनिदानं नाम प्रथमः+अध्यायः॥1॥
द्वितीयः+अध्यायः।
अथ+अतः+ ज्वरनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
ज्वरः+ रोगपतिः पाप्मा मृत्युः+ओजोशनः+अन्तकः।
क्रोधः+ दक्षाध्वरध्वंसी रुद्रोर्ध्वनयनोद्भवः॥1॥
जन्मान्तयोः+मोहमयः सन्तापात्मा+अपचारजः।
विविधैः+नामभिः क्रूरः+ नानायोनिषु वर्तते॥2॥
स जायते+अष्टधा दोषैः पृथक्+मिश्रैः समागतैः।
आगन्तुः+च मलाः+तत्र स्वैः स्वैः+दुष्टाः प्रदूषणैः॥3॥
आमाशयं प्रविश्य+आमम्+अनुगम्य पिधाय च।
स्रोतांसि पक्तिस्थानात्+च निरस्य ज्वलनं बहिः॥4॥

सह तेन+अभिसर्पन्तः+तपन्तः सकलं वपुः।
कुर्वन्तः+ गात्रम्+अत्युष्णं ज्वरं निर्वर्तयन्ति ते॥5॥
स्रोतोविबन्धात्प्रायेण ततः स्वेदः+ न जायते।
तस्य प्राग्रूपम्+आलस्यम्+अरतिः+गात्रगौरवम्॥6॥
आस्यवैरस्यमरुचिजृम्भा सास्राकुलाक्षिता।
अङ्गमर्दः+अविपाकः+अल्पप्राणता बहुनिद्रता॥7॥
रोमहर्षः+ विनमनं पिण्डिकोद्वेष्टनं क्लमः।
हितोपदेशेषु+अवक्षान्तिः प्रीतिः+अम्लपटूषणे॥8॥
द्वेषः स्वादुषु भक्ष्येषु तथा बालेषु तृड् भृशम्।
शब्दाग्निशीतवाताम्बुच्छायोष्णेष्वनिमित्ततः॥9॥
इच्छा द्वेषः+च तदनु ज्वरस्य व्यक्तता भवेत्।
आगमापगमक्षोभमृदुतावेदनोष्मणाम्॥10॥
वैषम्यं तत्रतत्र+अङ्गे ताः+ताः स्युः+वेदनाः+चलाः।
पादयोः सुप्तता स्तम्भः पिण्डिका+उद्वेष्टनं श्रमः॥11॥
विश्लेषः+ इव सन्धीनां साद ऊर्वोः कटीग्रहः।
पृष्ठं क्षोदम्+इव+आप्नोति निष्पीड्यत इव+उदरम्॥12॥
छिद्यन्तः+ इव च+अस्थीनि पार्श्वगानि विशेषतः।
हृदयस्य ग्रहः+तोदः प्राजनेन+इव वक्षसः॥13॥
स्कन्धयोः+मथनं बाह्वोः+भेदः पीडनम्+अंसयोः।
अशक्तिः+भक्षणे हन्वोः+जृम्भणं कर्णयोः स्वनः॥14॥
निस्तोदः शङ्खयोः+मूर्ध्नि वेदना विरसास्यता।
कषायास्यत्वम्+अथवा मलानाम्+अप्रवर्तनम्॥15॥
रूक्षारुणत्वगास्याक्षिनखमूत्रपुरीषता।
प्रसेकारोचकाश्रद्धाविपाकास्वेदजागराः॥16॥
कण्ठौष्ठशोषः+तृट् शुष्कौ छर्दिकासौ विषादिता।
हर्षः+ रोमाङ्गदन्तेषु वेपथुः क्षवथोः+ग्रहः॥17॥
भ्रमः प्रलापः+ घर्मेच्छा विनामः+च+अनिलज्वरे।
युगपद्व्याप्तिरङ्गानां प्रलापः कटुवक्त्रता॥18॥
नासास्यपाकः शीतेच्छा भ्रमः+ मूर्च्छा मदः+अरतिः।
विट्स्रंसः पित्तवमनं रक्तष्ठीवनमम्लकः॥19॥
रक्तकोठोद्गमः पीतहरितत्वं त्वगादिषु।
स्वेदः+ निःश्वासवैगन्ध्यमतितृष्णा च पित्तजे॥20॥

विशेषादरुचिः+जाड्यं स्रोतोरोधः+अल्पवेगता।
प्रसेकः+ मुखमाधुर्यं हृल्लेपश्वासपीनसाः॥21॥
हृल्लासश्छर्दनं कासः स्तम्भः श्वैत्यं त्वगादिषु।
अङ्गेषु शीतपिटिकाः+तन्द्रोदर्दः कफोद्भवे॥22॥
काले यथास्वं सर्वेषां प्रवृत्तिः+वृद्धिः+एव वा।
निदानोक्तानुपशयः+ विपरीतोपशायिता।
यथास्वं लिङ्गसंसर्गे ज्वरः संसर्गजः अपि च॥23॥
शिरोर्तिमूर्च्छावमिदाहमोहकण्ठास्यशोषारतिपर्वभेदाः।
उन्निद्रतातृड्भ्रमरोमहर्षा जृम्भातिवाक्त्वं च चलात्+सपित्तात्॥24॥
तापहान्यरुचिपर्वशिरोरुक् पीनसश्वसनकासविबन्धाः।
शीतजाड्यतिमिरभ्रमतन्द्राः श्लेष्मवातजनितज्वरलिङ्गम्॥25॥
शीतस्तम्भस्वेददाहाव्यवस्था तृष्णाकासश्लेष्मपित्तप्रवृत्तिः।
मोहस्तन्द्रालिप्ततिक्तास्यता च ज्ञेयं रूपं श्लेष्मपित्तज्वरस्य॥26॥
सर्वजः+ लक्षणैः सर्वैः+दाहः+अत्र च मुहुः+मुहुः।
तद्वत्+शीतं महानिद्रा दिवा जागरणं निशि॥27॥
सदा वा न+एव वा निद्रा महास्वेदः+अति न+एव वा।
गीतनर्तनहास्यादिविकृतेहाप्रवर्तनम्॥28॥
साश्रुणी कलुषे रक्ते भुग्ने लुलितपक्ष्मणी।
अक्षिणी पिण्डिकापार्श्वम्+ऊर्द्धपर्वास्थिरुग्भ्रमः॥29॥
सस्वनौ सरुजौ कर्णौ कण्ठः शूकैः+इव+आचितः।
परिदग्धा खरा जिह्वा गुरुः स्रस्ताङ्गसन्धिता॥30॥
रक्तपित्तकफष्ठीवः+ लोलनं शिरसः+अतिरुक्।
कोठानां श्यावरक्तानां मण्डलानां च दर्शनम्॥31॥
हृद्व्यथा मलसंसङ्गः प्रवृत्तिः+वा+अल्पशः+अति वा।
स्निग्धास्यता बलभ्रंशः स्वरसादः प्रलापिता॥32॥
दोषपाकः+चिरात्+तन्द्रा प्रततं कण्ठकूजनम्।
सन्निपातम्+अभिन्यासं तं ब्रूयात्+च हृतौजसम्॥33॥
दोषे विबद्धे नष्टे+अग्नौ सर्वसम्पूर्णलक्षणः।
असाध्यः सः+अन्यथा कृच्छ्रः+ भवेत्+वैकल्यदः+अपि वा॥34॥
अन्यत्+च सन्निपातोत्थः+ यत्र पित्तं पृथक् स्थितम्।
त्वचि कोष्ठे+अथवा दाहं विदधाति पुरः+अनु वा॥35॥
तद्वत्+वातकफौ शीतं, दाहादिः+दुस्तरः+तयोः।

शीतादौ तत्र पित्तेन कफे स्यन्दितशोषिते॥36॥
शीते शान्ते+अम्लकः+ मूर्च्छा मदः+तृष्णा च जायते।
दाहादौ पुनः+अन्ते स्युः+तन्द्राष्ठीववमिक्लमाः॥37॥
आगन्तुः+अभिघाताभिषङ्गशापाभिचारतः।
चतुर्धा अत्र क्षतच्छेददाहाद्यैः+अभिघातजः॥38॥
श्रमात्+च तस्मिन्+पवनः प्रायः+ रक्तं प्रदूषयन्।
सव्यथाशोफवैवर्ण्यं, सरुजं कुरुते ज्वरम्॥39॥
ग्रहावेशौषधिविषक्रोधभीशोककामजः।
अभिषङ्गात् ग्रहेण+अस्मिन्+अकस्मात्+हासरोदने॥40॥
ओषधीगन्धजे मूर्च्छा शिरोरुक्+वमथुः क्षवः।
विषान्+मूर्च्छातिसारास्यश्यावतादाहहृद्गदाः॥41॥
क्रोधात्+कम्पः शिरोरुक् च प्रलापः+ भयशोकजे।
कामात्+भ्रमः+अरुचिः+दाहः+ ह्रीनिद्राधीधृतिक्षयः॥42॥
ग्रहादौ सन्निपातस्य भयादौ मरुतः+त्रये।
कोपः कोपे+अपि पित्तस्य यौ तु शापाभिचारजौ॥43॥
सन्निपातज्वरौ घोरौ तौ+असह्यतमौ मतौ।
तत्र+आभिचारिकैः+मन्त्रैः+हूयमानस्य तप्यते॥44॥
पूर्वं चेतः+ततः+ देहः+ततः+ विस्फोटतृड्भ्रमैः।
सदाहमूर्च्छैः+ग्रस्तस्य प्रत्यहं वर्द्धते ज्वरः॥45॥
इति ज्वरः+अष्टधा दृष्टः समासात्+द्विविधः+तु सः।
शारीरः+ मानसः सौम्यः+तीक्ष्णः+अन्तर्बहिराश्रयः॥46॥
प्राकृतः+ वैकृतः साध्यः+असाध्यः सामः+ निरामकः।
पूर्वं शरीरे शारीरे तापः+, मनसि मानसे॥47॥
पवने योगवाहित्वात्+शीतं श्लेष्मयुते भवेत्।
दाहः पित्तयुते, मिश्रं मिश्रे अन्तःसंश्रये पुनः॥48॥
ज्वरे+अधिकं विकाराः स्युः+अन्तः क्षोभः+ मलग्रहः।
बहिः+एव बहिः+वेगे तापः+अपि च सुसाध्यता॥49॥
वर्षाशरद्वसन्तेषु वाताद्यैः प्राकृतः क्रमात्।
वैकृतः+अन्यः सः+ दुःसाध्यः प्रायः+च प्राकृतः+अनिलात्॥50॥
वर्षासु मारुतः+ दुष्टः पित्तश्लेष्मान्वितः+ ज्वरम्।
कुर्यात् पित्तं च शरदि तस्य च+अनुबलं कफः॥51॥
तत्+प्रकृत्या विसर्गात्+च तत्र न+अनशनात्+भयम्।

कफः+ वसन्ते तम्+अपि वातपित्तं भवेत्+अनु॥52॥
बलवत्+स्वल्पदोषेषु ज्वरः साध्यः+अनुपद्रवः।
सर्वथा विकृतिज्ञाने प्राक्+असाध्यः+ उदाहृतः॥53॥
ज्वरोपद्रवतीक्ष्णत्वम्+अग्लानिः+बहुमूत्रता।
न प्रवृत्तिः+न विड् जीर्णा न क्षुत्+सामज्वराकृतिः॥54॥
ज्वरवेगः+अधिकं तृष्णा प्रलापः श्वसनं भ्रमः।
मलप्रवृत्तिरुत्+क्लेशः पच्यमानस्य लक्षणम्॥55॥
जीर्णता+आमविपर्यासात्+सप्तरात्रं च लङ्घनात्।
ज्वरः पञ्चविधः प्रोक्तः+ मलकालबलाबलात्॥56॥
प्रायशः सन्निपातेन भूयसा तु+उपदिश्यते।
सन्ततः सततः+अन्येद्युः+तृतीयकचतुर्थकौ॥57॥
धातुमूत्रशकृद्वाहिस्रोतसां व्यापिनः+ मलाः।
तापयन्तः+तनुं सर्वां तुल्यदूष्यादिवर्द्धिताः॥58॥
बलिनः+ गुरवः, स्तब्धा विशेषेण रसाश्रिताः।
सन्ततं निष्प्रतिद्वन्द्वा ज्वरं कुर्युः सुदुःसहम्॥59॥
मलं ज्वरोष्मा धातून्+वा सः+ शीघ्रं क्षपयेत्+ततः।
सर्वाकारं रसादीनां शुद्ध्या+अशुद्ध्या+अपि वा क्रमात्॥60॥
वातपित्तकफैः सप्त दश द्वादश वासरान्।
प्रायः+अनुयाति मर्यादां मोक्षाय च वधाय च॥61॥
इति+अग्निवेशस्य मतं, हारीतस्य पुनः स्मृतिः।
द्विगुणा सप्तमी यावत्+नवम्येकादशी तथा॥62॥
एषा त्रिदोषमर्यादा मोक्षाय च वधाय च।
शुद्ध्यशुद्धौ ज्वरः कालं दीर्घम्+अपि+अनुवर्तते॥63॥
कृशानां व्याधिमुक्तानां मिथ्याहारादिसेविनाम्।
अल्पः+अपि दोषः+ दूष्यादेर्लब्ध्वा+अन्यतमतः+ बलम्॥64॥
सविपक्षः+ ज्वरं कुर्यात्+विषमं क्षयवृद्धिभाक्।
दोषः प्रवर्तते तेषां स्वे काले ज्वरयन् बली॥65॥
निवर्तते पुनः+च+एषः+ प्रत्यनीकबलाबलः।
क्षीणे दोषे ज्वरः सूक्ष्मः+ रसादिषु+एव लीयते॥66॥
लीनत्वात्+कार्श्यवैवर्ण्यजाड्यादीन्+आदधाति सः।
आसन्नविवृतास्यत्वात्+स्रोतसां रसवाहिनाम्॥67॥
आशु सर्वस्य वपुषः+ व्याप्तिः+दोषेण जायते।

सन्ततः सततस्+तेन, विपरीतः+ विपर्ययात्॥68॥
विषमः+ विषमारम्भक्रियाकालः+अनुषङ्गवान्।
दोषः+ रक्ताश्रयः प्रायः करोति सततं ज्वरम्॥69॥
अहोरात्रस्य सः+ द्विः स्यात् सकृत्+अन्येद्युः+आश्रितः।
तस्मिन्+मांसवहा नाडीः मेदोनाडीः+तृतीयके॥70॥
ग्राही पित्तनिलात्+मूर्ध्नः+त्रिकस्य कफपित्ततः।
सपृष्ठस्य+अनिलकफात्+सः+ च+एकाहान्तरः स्मृतः॥71॥
चतुर्थकः+ मले मेदोमज्जास्थ्यन्यतमस्थिते।
मज्जस्थः+ एव+इति+अपरे प्रभावं सः+ तु दर्शयेत्॥72॥
द्विधा कफेन जंघाभ्यां सः+ पूर्वं शिरसः+अनिलात्।
अस्थिमज्जोभयगते चतुर्थकविपर्ययः॥73॥
त्रिधा, द्व्यहं ज्वरयति दिनम्+एकं तु मुञ्चति।
बलाबलेन दोषाणाम्+अन्नचेष्टादिजन्मना॥74॥
ज्वरः स्यात्+मनसः+तद्वत्+कर्मणः+च तदा तदा।
दोषदूष्यर्त्वहोरात्रप्रभृतीनां बलात्+ज्वरः॥75॥
मनसः+ विषयाणां च कालं तं तं प्रपद्यते।
धातून् प्रक्षोभयन् दोषः+ मोक्षकाले विलीयते॥76॥
ततः+ नरः श्वसन् स्विद्यन् कूजन् वमति चेष्टते।
वेपते प्रलपति+उष्णैः शीतैः+च+अङ्गैः+हतप्रभः॥77॥
विसंज्ञः+ ज्वरवेगार्तः सक्रोधः+ इव वीक्षते।
सदोषशब्दं च शकृत्+द्रवं सृजति वेगवत्॥78॥
देहः+ लघुः+व्यपगतक्लममोहतापः
पाकः+ मुखे करणसौष्ठवम्+अव्यथत्वम्।
स्वेदः क्षवः प्रकृतियोगिमनः+अन्नलिप्सा
कण्डूः+च मूर्ध्नि विगतज्वरलक्षणानि॥79॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने ज्वरनिदानं नाम द्वितीयः+अध्ययाः॥2॥

तृतीयः+अध्यायः।

अथ+अतः+ रक्तपित्तकासनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
भृशोष्णतीक्ष्णकट्वम्ललवणादिविदाहिभिः।
कोद्रवोद्दालकैः+च+अन्नैः+तद्युक्तैः+अतिसेवितैः॥1॥

कुपितं पित्तलैः पित्तं द्रवं रक्तं च मूर्च्छिते।
ते मिथः+तुल्यपरूपत्वम्+आगम्य व्याप्नुतः+तनुम्॥2॥
पित्तं रक्तस्य विकृतेः संसर्गात्+दूषणात्+अपि।
गन्धवर्णानुवृत्तेः+च रक्तेन व्यपदिश्यते॥3॥
प्रभवति+असृजः स्थानात्+प्लीहतः+ यकृतः+च तत्।
शिरोगुरुत्वम्+अरुचिः शीतेच्छा धूमकः+अम्लकः॥4॥
छर्दिश्छर्दितबैभत्स्यं कासः श्वासः+ भ्रमः क्लमः।
लोहलोहितमत्स्यामगन्धास्यत्वं स्वरक्षयः॥5॥
रक्तहारिद्रहरितवर्णता नयनादिषु।
नीललोहितपीतानां वर्णानाम्+अविवेचनम्॥6॥
स्वप्ने तद्वर्णदर्शित्वं भवति+अस्मिन् भविष्यति।
ऊर्ध्वं नासाक्षिकर्णास्यैः+मेढ्रयोनिगुदैः+अधः॥7॥
कुपितं रोमकूपैः+च समस्तैः+तत्+प्रवर्तते।
ऊर्ध्वं साध्यं कफादि+अस्मात्+तद्विरेचनसाधनम्॥8॥
बह्वौषधं च, पित्तस्य विरेकः+ हि वरौषधम्।
अनुबन्धी कफः+ यः+च तत्र तस्य+अपि शुद्धिकृत्॥9॥
कषायाः स्वादवः+अपि+अस्य विशुद्धश्लेष्मणः+ हिताः।
किमु तिक्ताः कषाया वा ये निसर्गात्+कफापहाः॥10॥
अधः+ याप्यं चलादि+अस्मात्+तत्+प्रच्छर्दनसाधनम्।
अल्पौषधं च पित्तस्य वमनं न वरौषधम्॥11॥
अनुबन्धी चलः+ यः+च शान्तये+अपि न तस्य तत्।
कषायाः+च हिताः+तस्य मधुरा एव केवलम्॥12॥
कफमारुतसंसृष्टम्+असाध्यम्+उभयायनम्।
अशक्यप्रातिलोम्यत्वात्+अभावात्+औषधस्य च॥13॥
न हि संशोधनं किञ्चित्+अस्ति+अस्य प्रतिलोमगम्।
शोधनं प्रतिलोमं च रक्तपित्ते भिषग्जितम्॥14॥
एवम्+एव+उपशमनं सर्वशः+ नास्य विद्यते।
संसृष्टेषु हि दोषेषु सर्वजित्+शमनं हितम्॥15॥
तत्र दोषानुगमनं सिरास्रः+ इव लक्षयेत्
उपद्रवान्+च विकृतिज्ञानतः+तेषु च+अधिकम्॥16॥
आशुकारी यतः कासः+तम्+एव+अतः प्रवक्ष्यति।
पञ्च कासाः स्मृता वातपित्तश्लेष्मक्षतक्षयैः॥17॥

क्षयायोपेक्षिताः सर्वे बलिनः+च+उत्तरोत्तरम्।
तेषां भविष्यतां रूपं कण्ठे कण्डूररोचकः॥18॥
शूकपूर्णाभकण्ठत्वं तत्र+अधः+ विहतः+अनिलः।
ऊर्ध्वं प्रवृत्तः प्राप्योरः+तस्मिन् कण्ठे च संसजन्॥19॥
शिरः स्रोतांसि सम्पूर्य ततः+अङ्गान्+उत्क्षिपन्+इव।
क्षिपन्+इव+अक्षिणी पृष्ठम्+उरः पार्श्वे च पीडयन्॥20॥
प्रवर्तते सः+ वक्त्रेण भिन्नकांस्योपमध्वनिः।
हेतुभेदात्+प्रतीघातभेदः+ वायोः सरंहसः॥21॥
यत्+रुजाशब्दवैषम्यं कासानां जायते ततः।
कुपितः+ वातलैः+वातः शुष्कोरःकण्ठवक्त्रताम्॥22॥
हृत्पार्श्वोरः शिरः शूलं मोहक्षोभस्वरक्षयान्।
करोति शुष्कं कासं च महावेगरुजास्वनम्॥23॥
सः+अङ्गहर्षी कफं शुष्कं कृच्छ्रान्+मुक्त्वा+अल्पतां व्रजेत्।
पित्तात्+पीताक्षिकफता तिक्तास्यत्वं ज्वरः+ भ्रमः॥24॥
पित्तासृग्वमनं तृष्णा वैस्वर्यं धूमकः+अम्लकः।
प्रततं कासवेगेन ज्योतिषाम्+इव दर्शनम्॥25॥
कफादुरः+अल्परुङ्मूर्द्धहृदयं स्तिमितं गुरु।
कण्ठोपलेपः सदनं पीनसच्छर्द्यरोचकाः॥26॥
रोमहर्षः+ घनस्निग्धश्वेतश्लेष्मप्रवर्तनम्।
युद्धाद्यैः साहसैः+तैः+तैः सेवितैः+अयथाबलम्॥27॥
उरस्यन्तः क्षते वायुः पित्तेन+अनुगतः+ बली।
कुपितः कुरुते कासं कफं तेन सशोणितम्॥28॥
पीतं श्यावं च शुष्कं च ग्रथितं कुथितं बहु।
ष्ठीवेत्+कण्ठेन रुजता विभिन्नेन+एव च+उरसा॥29॥
सूचीभिः+इव तीक्ष्णाभिः+तुद्यमानेन शूलिना।
पर्वभेदज्वरश्वासतृष्णावैस्वर्यकम्पवान्॥30॥
पारावतः+ इव+आकूजन् पार्श्वशूली ततः+अस्य च।
क्रमात्+वीर्यं रुचिः पक्ता बलं वर्णः+च हीयते॥31॥
क्षीणस्य सासृङ्मूत्रत्वं स्यात्+च पृष्ठकटीग्रहः।
वायुप्रधानाः कुपिता धातवः+ राजयक्ष्मिणः॥32॥
कुर्वन्ति यक्ष्मायतनैः कासं ष्ठीवेत्+कफं ततः।
पूतिपूयोपमं पीतं विस्रं हरितलोहितम्॥33॥

लुच्येत इव पार्श्वे च हृदयं पतति+इव च।
अकस्मात्+उष्णशीतेच्छा बह्वाशित्वं बलक्षयः॥34॥
स्निग्धप्रसन्नवक्त्रत्वं श्रीमत्+दशननेत्रता।
ततः+अस्य क्षयरूपाणि सर्वाणि+आविर्भवन्ति च॥35॥
इति+एष क्षयजः कासः क्षीणानां देहनाशनः।
याप्यः+ वा बलिनां, तद्वत् क्षतजः+अभिनवौ तु तौ॥36॥
सिध्येताम्+अपि सानाथ्यात् साध्या दोषैः पृथक् त्रयः।
मिश्रा याप्या द्वयात्+सर्वे जरसा स्थविरस्य च॥37॥
कासात्+श्वासक्षयच्छर्दिस्वरसादादयः+ गदाः।
भवन्ति+उपेक्षया यस्मात्+तस्मात्+तं त्वरया जयेत्॥38॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने रक्तपित्तकासनिदानं नाम तृतीयः+अध्यायः॥3॥

चतुर्थः+अध्यायः।

अथ+अतः श्वासहिध्मानिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
कासवृध्द्या भेवत्+श्वासः पूर्वैः+वा दोषकोपनैः।
आमातिसारवमथुविषपाण्डुज्वरैः+अपि॥1॥
रजोधूमानिलैः+मर्मघातात्+अतिहिमाम्बुना।
क्षुद्रकः+तमकः+छिन्नः+ महान्+ऊर्ध्वः+च पञ्चमः॥2॥
कफोपरुद्धगमनः पवनः+ विष्वगास्थितः।
प्राणोदकान्नवाहीनि दुष्टः स्रोतांसि दूषयन्॥3॥
उरःस्थः कुरुते श्वासम्+आमाशयसमुद्भवम्।
प्राग्रूपं तस्य हृत्पार्श्वशूलं प्राणविलोमता॥4॥
आनाहः शङ्खभेदः+च तत्र+आयासातिभोजनैः।
प्रेरितः प्रेरयेत् क्षुद्रं स्वयं संशमनं मरुत्॥5॥
प्रतिलोमं सिरा गच्छन्+उदीर्य पवनः कफम्।
परिगृह्य शिरोग्रीवम्+उरः पार्श्वे च पीडयन्॥6॥
कासं घुर्घुरकं मोहम्+अरुचिं पीनसं तृषम्।
करोति तीव्रवेगं च श्वासं प्राणोपतापिनम्॥7॥
प्रताम्येत्+तस्य वेगेन निष्ठ्यूतान्ते क्षणं सुखी।
कृच्छ्रात्+शयानः श्वसिति निषण्णः स्वास्थ्यम्+ऋच्छति॥8॥
उच्छ्रिताक्षः+ ललाटेन स्विद्यता भृशम्+अर्तिमान्।

विंशुष्कास्यः+ मुहुःश्वासी काङ्क्षति+उष्णं सवेपथुः॥9॥
मेघाम्बुशीतप्राग्वातैः श्लेष्मलैः+च विवर्द्धते।
स याप्यः+तमकः, साध्यः+ नवः+ वा बलिनः+ भवेत्॥10॥
ज्वरमूर्च्छायुतः शीतैः शाम्येत्+प्रतमकः+तु सः।
छिन्नात्+श्वसिति विच्छिन्नं मर्मच्छेदरुजार्दितः॥11॥
सस्वेदमूर्च्छः सानाहः+ बस्तिदाहनिरोधवान्।
अधोदृग्विप्लुताक्षः+च मुह्यन् रक्तैकलोचनः॥12॥
शुष्कास्यः प्रलपन् दीनः+ नष्टच्छायः+ विचेतनः।
महता महता दीनः+ नादेन श्वसिति क्रथन्॥13॥
उद्धूयमानः संरब्धः+ मत्तर्षभः+ इव+अनिशम्।
प्रणष्टज्ञानविज्ञानः+ विभ्रान्तनयनाननः॥14॥
वक्षः समाक्षिपन् बद्धमूत्रवर्चा विशीर्णवाक्।
शुष्ककण्ठः+ मुहुः+मुह्यन् कर्णशङ्खशिरोतिरुक्॥15॥
दीर्घमूर्ध्वं श्वसिति+ऊर्ध्वात्+न च प्रत्याहरति+अधः।
श्लेष्मावृतमुखस्रोताः क्रुद्धगन्धवहार्दितः॥16॥
ऊर्ध्वदृक्+वीक्षते भ्रान्तम्+अक्षिणी परितः क्षिपन्।
मर्मसु च्छिद्यमानेषु परिदेवी निरुद्धवाक्॥17॥
एते सिध्द्येयुः+अव्यक्ता व्यक्ताः प्राणहरा ध्रुवम्।
श्वासैकहेतुप्राग्रूपसङ्ख्याप्रकृतिसंश्रयाः॥18॥
हिध्माः भक्तोद्भवा क्षुद्रा यमला महति+इति च।
गम्भीरा च मरुत्+तत्र त्वरया+अयुक्तिसेवितैः॥19॥
रूक्षतीक्ष्णखरासात्म्यैः+अन्नपानैः प्रपीडितः।
करोति हिध्माम्+अरुजां मन्दशब्दां क्षवानुगाम्॥20॥
शमं सात्म्यान्नपानेन या प्रयाति च सा+अन्नजा।
आयासात्+पवनः क्षुद्रः क्षुद्रां हिघ्मां प्रवर्तयेत्॥21॥
जत्रुमूलप्रविसृताम्+अल्पवेगां मृदुं च सा।
वृद्धिम्+आयास्यतः+ याति भुक्तमात्रे च मार्दवम्॥22॥
चिरेण यमलैः+वेगैः+आहारे या प्रवर्तते।
परिणामोन्मुखे वृद्धिं परिणामे च गच्छति॥23॥
कम्पयन्ती शिरोग्रीवम्+आध्मातस्य+अतितृष्यतः।
प्रलापच्छर्द्यतीसारनेत्रविप्लुतिजृम्भिणः॥24॥
यमला वेगिनी हिध्मा परिणामवती च सा।

स्तब्धभ्रूशङ्खयुग्मस्य सास्रविप्लुतचक्षुषः॥25॥
स्तम्भयन्ती तनुं वाचं स्मृतिं संज्ञां च मुष्णती।
रुन्धती मार्गम्+अन्नस्य कुर्वती मर्मघट्टनम्॥26॥
पृष्ठतः+ नमनं शोषं महाहिध्मा प्रवर्तते।
महामूला महाशब्दा महावेगा महाबला॥27॥
पक्वाशयात्+वा नाभेः+वा पूर्ववद्या प्रवर्तते।
तद्रूपा सा मुहुः कुर्यात्+जृम्भाम्+अङ्गप्रसारणम्॥28॥
गम्भीरेण+अनुनादेन गम्भीरा तासु साधयेत्।
आद्ये द्वे, वर्जयेत्+अन्त्ये सर्वलिङ्गं च वेगिनीम्॥29॥
सर्वाः+च सञ्चितामस्य स्थविरस्य व्यवायिनः।
व्याधिभिः क्षीणदेहस्य भक्तच्छेदक्षतस्य वा॥30॥
सर्वे+अपि रोगा नाशाय न तु+एवं शीघ्रकारिणः।
हिध्माश्वासौ यथा तौ हि मृत्युकाले कृतालयौ॥31॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने श्वासहिध्मानिदानं नाम चतुर्थः+अध्यायः॥4॥
पञ्चमः+अध्यायः।
अथ+अतः+ राजयक्ष्मादिनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
अनेकरोगानुगतः+ बहुरोगपुरोगमः।
राजयक्ष्मा क्षयः शोषः+ रोगराड्+इति च स्मृतः॥1॥
नक्षत्राणां द्विजानां च राज्ञः+अभूत्+यत्+अयं पुरा।
यत्+च राजा च यक्ष्मा च राजयक्ष्मा ततः+ मतः॥2॥
देहौषधक्षयकृतेः क्षयः+तत्+सम्भवात्+च सः।
रसादिशोषणात्+शोषः+ रोगराट् तेषु राजनात्॥3॥
साहसं वेगसंरोधः शुक्रौजः स्नेहसङ्क्षयः।
अन्नपानविधित्यागः+चत्वारः+तस्य हेतवः॥4॥
तैः+उदीर्णः+अनिलः पित्तं कफं च+उदीर्य सर्वतः।
शरीरसन्धीन्+आविश्य तान् सिराः+च प्रपीडयन्॥5॥
मुखानि स्रोतसां रुद्ध्वा तथा+एव+अतिविवृत्य वा।
सर्पन्+ऊर्ध्वम्+अधः+तिर्यक्+यथास्वं जनयेत्+गदान्॥6॥
रूपं भविष्यतः+तस्य प्रतिश्यायः+ भृशं क्षवः।
प्रसेकः+ मुखमाधुर्यं सदनं वह्निदेहयोः॥7॥

स्थाली+अत्र+अन्नपानादौ शुचौ+अपि+अशुचीक्षणम्।
मक्षिकातृणकेशादिपातः प्रायः+अन्नपानयोः॥8॥
हृल्लासश्छर्दिररुचिः+अश्नतः+अपि बलक्षयः।
पाण्योः+अवेक्षा पादास्यशोफः+अक्ष्णोः+अतिशुक्लता॥9॥
बाह्वोः प्रमाणजिज्ञासा काये बैभत्स्यदर्शनम्।
स्त्रीमद्यमांसप्रियता घृणित्वं मूर्द्धगुण्ठनम्॥10॥
नखकेशातिवृद्धिः+च, स्वप्ने च+अभिभवः+ भवेत्।
पतङ्गकृकलासाहिकपिश्वापदपक्षिभिः॥11॥
केशास्थितुषभस्मादिराशौ समधिरोहणम्।
शून्यानां ग्रामदेशानां दर्शनं शुष्यतः+अम्भसः॥12॥
ज्योतिः+गिरीणां पततां ज्वलतां च महीरुहाम्।
पीनसश्वासकासांसमूर्द्धस्वररुजः+अरुचिः॥13॥
ऊर्ध्वं, विड्भ्रंशसंशोषावधः, च्छर्दिः+च कोष्ठगे।
तिर्यक्स्थे पार्श्वरुग्दोषे, सन्धिगे भवति ज्वरः॥14॥
रूपाणि+एकादश+एतानि जायन्ते राजयक्ष्मिणः।
तेषाम्+उपद्रवान् विद्यात्+कण्ठोद्ध्वंसम्+उरोरुजम्॥15॥
जृम्भाङ्गमर्दनिष्ठीववह्निसादास्यपूतिताः।
तत्र वातात्+शिरः पार्श्वशूलम्+अंसाङ्गमर्दनम्॥16॥
कण्ठोद्ध्वंसः स्वरभ्रंशः पित्तात्+पादांसपाणिषु।
दाहः+अतिसारः+असृक्छर्दिः+मुखगन्धः+ ज्वरः+ मदः॥17॥
कफात्+अरोचकश्छर्दिः कासः+ मूर्द्धाङ्गगौरवम्।
प्रसेकः पीनसः श्वासः स्वरसादः+अल्पवह्निता॥18॥
दोषैः+मन्दानलत्वेन सोपलेपैः कफोल्बणैः।
स्रोतोमुखेषु रुद्धेषु धातूष्मस्वल्पकेषु च॥19॥
विदह्यमानः स्वस्थाने रसस्तान्+तान्+उपद्रवान्।
कुर्यात्+अगच्छन्+मांसादीन्+असृक् च+ऊर्ध्वं प्रधावति॥20॥
पच्यते कोष्ठः+ एव+अन्नम्+अन्नपक्त्रा+इव च+अस्य यत्।
प्रायः+अस्मान्+मलतां यातं न+एव+अलं धातुपुष्टये॥21॥
रसः+अपि+अस्य न रक्ताय मांसाय कुतः+ एव तु।
उपस्तब्धः सः+ शकृता केवलं वर्तते क्षयी॥22॥
लिङ्गेषु+अल्पेषु+अपि क्षीणं व्याधौषधबलाक्षमम्।
वर्जयेत् साधयेत्+एव सर्वेषु+अपि ततः+अन्यथा॥23॥

दोषैः+व्यस्तैः समस्तैः+च क्षयात् षष्ठः+च मेदसा।
स्वरभेदः+ भवेत् तत्र क्षामः+ रूक्षः+चलः स्वरः॥24॥
शूकपूर्णाभकण्ठत्वं स्निग्धोष्णोपशयः+अनिलात्।
पित्तात्+तालुगले दाहः शोषः+ उक्तौ+असूयनम्॥25॥
लिम्पन्+इव कफात्+कण्ठं मन्दः खुरखुरायते।
स्वरः+ विबद्धः सर्वैः+तु सर्वलिङ्गः क्षयात्+कषेत्॥26॥
धूमायति+इव च+अत्यर्थम् मेदसा श्लेष्मलक्षणः।
कृच्छ्रलक्ष्याक्षरः+च अत्र सर्वैः+अन्त्यं च वर्जयेत्॥27॥
अरोचकः+ भवेत्+दोषैः+जिह्वाहृदयसंश्रयैः।
सन्निपातेन मनसः सन्तापेन च पञ्चमः॥28॥
कषायतिक्तमधुरं वातादिषु मुखं क्रमात्।
सर्वोत्थे विरसं शोकक्रोधादिषु यथामलम्॥29॥
छर्दिः+दोषैः पृथक्+सर्वैः+द्विष्टैः+अर्थैः+च पञ्चमी।
उदानः+ विकृतः+ दोषान् सर्वासु+अपि+ऊर्ध्वम्+अस्यति॥30॥
तासु+उत्क्लेशास्यलावण्यप्रसेकारुचयः+अग्रगाः।
नाभिपृष्ठं रुजन् वायुः पार्श्वे च+आहारम्+उत्क्षिपेत्॥31॥
ततः+ विच्छिन्नम्+अल्पाल्पं कषायं फेनिलं वमेत्।
शब्दोद्गारयुतं कृष्णम्+अच्छं कृच्छ्रेण वेगवत्॥32॥
कासास्यशोषहृन्मूर्द्धस्वरपीडाक्लमान्वितः।
पित्तात्+क्षारोदकनिभं धूम्रं हरितपीतकम्॥33॥
सासृगम्लं कटूष्णं च तृण्मूर्च्छातापदाहवत्।
कफात् स्निग्धं घनं शीतं श्लेष्मतन्तुगवाक्षितम्॥34॥
मधुरं लवणं भूरि प्रसक्तं लोमहर्षणम्।
मुखश्वयथुमाधुर्यतन्द्राहृल्लासकासवान्॥35॥
सर्वलिङ्गा मलैः सर्वैः+ रिष्टोक्ता या च तां त्यजेत्।
पूत्यमेध्याशुचिद्विष्टदर्शनश्रवणादिभिः॥36॥
तप्ते चित्ते हृदि क्लिष्टे छर्दिः+द्विष्टार्थयोगजा।
वातादीन्+एव विमृशेत्+कृमितृष्णाम्+अदौहृदे॥37॥
शूलवेपथुहृल्लासैः+विशेषात् कृमिजां वदेत्।
कृमिहृद्रोगलिङ्गैः+च स्मृताः पञ्च तु हृद्गदाः॥38॥
तेषां गुल्मनिदानोक्तैः समुत्थानैः+च सम्भवः।
वातेन शूल्यते+अत्यर्थं तुद्यते स्फुटति+इव च॥39॥

भिद्यते शुष्यति स्तब्धं हृदयं शून्यता द्रवः।
अकस्मात्+दीनता शोकः+ भयं शब्दासहिष्णुता॥40॥
वेपथुः+वेष्टनं मोहः श्वासरोधः+अल्पनिद्रता।
पित्तात्+तृष्णा भ्रमः+ मूर्च्छा दाहः स्वेदः+अम्लकः क्मलः॥41॥
छर्दनं च+अम्लपित्तस्य धूमकः पीतता ज्वरः।
श्लेष्मणा हृदयं स्तब्धं भारिकं साश्मगर्भवत्॥42॥
कासाग्निसादनिष्ठीवनिद्रालस्यारुचिज्वराः।
सर्वलिङ्गः+त्रिभिः+दोषैः कृमिभिः श्यावनेत्रता॥43॥
तमः प्रवेशः+ हृल्लासः शोषः कण्डूः कफस्रुतिः।
हृदयं प्रततं च+अत्र क्रकचेन+एव दार्यते॥44॥
चिकित्सेत्+आमयं घोरं तं शीघ्रं शीघ्रकारिणम्।
वातात्+पित्तात्+कफात्+तृष्णा सन्निपातात्+रसक्षयात्॥45॥
षष्ठी स्यात्+उपसर्गात्+च वातपित्ते तु कारणम्।
सर्वासु तत्+प्रकोपः+ हि सौम्यधातुप्रशोषणात्॥46॥
सर्वदेहभ्रमोत्कम्पतापतृड्दाहमोहकृत्।
जिह्वामूलगलक्लोमतालुतोयवहाः सिराः॥47॥
संशोष्य तृष्णा जायन्ते तासां सामान्यलक्षणम्।
मुखशोषः+ जलातृप्तिः+अन्नद्वेषः स्वरक्षयः॥48॥
कण्ठौष्ठजिह्वाकार्कश्यं जिह्वानिष्क्रमणं क्लमः।
प्रलापः+चित्तविभ्रंशस्तृड्ग्रहोक्ताः+तथा+आमयाः॥49॥
मारुतात् क्षामता दैन्यं शङ्खतोदः शिरोभ्रमः।
गन्धाज्ञानास्यवैरस्यश्रुतिनिद्राबलक्षयाः॥50॥
शीताम्बुपानात्+वृद्धिः+च पित्तात्+मूर्च्छास्यतिक्तता।
रक्तोक्षणत्वं प्रततं शोषः+ दाहः+अतिधूमकः॥51॥
कफः+ रुणद्धि कुपितः+तोयवाहिषु मारुतम्।
स्रोतःसु सः+ कफः+तेन पङ्कवत्+शोष्यते ततः॥52॥
शुकैः+इव+अचितः कण्ठः+ निद्रा मधुरवक्त्रता।
आध्मानं शिरसः+ जाड्यं स्तैमित्यच्छर्द्यरोचकाः॥53॥
आलस्यम्+अविपाकः+च सर्वैः स्यात्+सर्वलक्षणा।
आमोद्भवा च, भक्तस्य संरोधात्+वातपित्तजा॥54॥
उष्णक्लान्तस्य सहसा शीताम्भः+ भजतः+तृषम्।
ऊष्मा रुद्धः+ गतः कोष्ठं यां कुर्यात्+पित्तजैव सा॥55॥

या च पानातिपानोत्था, तीक्ष्णाग्नेः स्नेहजा च या।
स्निग्धगुर्वम्ललवणभोजनेन कफोद्भवा॥56॥
तृष्णा रसक्षयोक्तेन लक्षणेन क्षयात्मिका।
शोषमेहज्वराद्यन्यदीर्घरोगोपसर्गतः॥57॥
या तृष्णा जायते तीव्रा सोपसर्गात्मिका स्मृता॥57 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने राजयक्ष्मादिनिदानं नाम पञ्चमः+अध्यायः॥5॥
षष्ठः+अध्यायः
अथ+अतः+ मदात्ययादिनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
तीक्ष्णोष्णरूक्षसूक्ष्माम्लं व्यवायि+आशुकरं लघु।
विकाषि विशदं मद्यम्+ओजसः+अस्मात्+विपर्ययः॥1॥
तीक्ष्णादयः+ विषे+अपि+उक्ताः+चित्तोपप्लाविनः+ गुणाः।
जीवितान्ताय जायन्ते विषे तु+उत्कर्षवृत्तितः॥2॥
तीक्ष्णादिभिः+गुणैः+मद्यं मन्दादीन्+ओजसः+ गुणान्।
दशभिः+दश सङ्क्षोभ्य चेतः+ नयति विक्रियाम्॥3॥
आद्ये मदे द्वितीये तु प्रमादायतने स्थितः।
दुर्विकल्पहतः+ मूढः सुखम्+इति+अधिमुच्यते॥4॥
मध्यमोत्तमयोः सन्धिं प्राप्य राजसतामसः।
निरङ्कुशः+ इव व्यालः+ न किञ्चित्+न+आचरेत्+जडः॥5॥
इयं भूमिः+अवद्यानां दौःशील्यस्य+इदम्+आस्पदम्।
एकः+अयं बहुमार्गाया दुर्गतेः+देशिकः परम्॥6॥
निश्चेष्टः शववत्+छेते तृतीये तु मदे स्थितः।
मरणात्+अपि पापात्मा गतः पापतरां दशाम्॥7॥
धर्माधर्मं सुखं दुःखम्+अर्थानर्थं हिताहितम्।
यदासक्तः+ न जानाति कथं तत्+शीलयेत्+बुधः॥8॥
मद्ये मोहः+ भयं शोकः क्रोधः+ मृत्युः+च संश्रिताः।
सोन्मादमदमूर्च्छायाः सापस्मारापतानकाः॥9॥
यत्रैकः स्मृतिविभ्रंशः+तत्र सर्वम्+असाधु यत्।
अयुक्तियुक्तम्+अन्नं हि व्याधये मरणाय वा॥10॥
मद्यं त्रिवर्गधीधैर्यलज्जादेः+अपि नाशनम्।
न+अति माद्यन्ति बलिनः कृताहारा महाशनाः॥11॥

स्निग्धाः सत्त्ववयोयुक्ता मद्यनित्याः+तदन्वयाः।
मेदःकफाधिका मन्दवातपित्ता दृढाग्नयः॥12॥
विपर्यये+अतिमाद्यन्ति विश्रब्धाः कुपिताः+च ये।
मद्येन च+अम्लरूक्षेण साजीर्णे बहुना+अति च॥13॥
वातात्+पित्तात्+कफात्+सर्वैः+चत्वारः स्युः+मदात्ययाः।
सर्वे+अपि सर्वैः+जायन्ते व्यपदेशः+तु भूयसा॥14॥
सामान्यं लक्षणं तेषां प्रमोहः+ हृदयव्यथा।
विड्भेदः प्रततं तृष्णा सौम्याग्नेयः+ ज्वरः+अरुचिः॥15॥
शिरःपार्श्वास्थिरुक्कम्पः+ मर्मभेदः+त्रिकग्रहः।
उरोविबन्धः+तिमिरं कासः श्वासः प्रजागरः॥16॥
स्वेदः+अतिमात्रं विष्टम्भः श्वयथुः+चित्तविभ्रमः।
प्रलापः+छर्दिरुत्क्लेशः+ भ्रमः+ दुःस्वप्नदर्शनम्॥17॥
विशेषात्+जागरश्वासकम्पमूर्धरुजः+अनिलात्।
स्वप्ने भ्रमति+उत्पतति प्रेतैः+च सह भाषते॥18॥
पित्तात्+दाहज्वरस्वेदमोहातीसारतृड्भ्रमाः।
देहः+ हरितहारिद्रः+ रक्तनेत्रकपोलता॥19॥
श्लेष्मणा छर्दिहृल्लासनिद्रोदर्दाङ्गगौरवम्।
सर्वजे सर्वलिङ्गत्वम् मुक्त्वा मद्यं पिबेत्+तु यः॥20॥
सहसा+अनुचितं वा+अन्यत्+तस्य ध्वंसकविक्षयौ।
भवेतां मारुतात्+कष्टौ दुर्बलस्य विशेषतः॥21॥
ध्वंसके श्लेष्मनिष्ठीवः कण्ठशोषः+अतिनिद्रता।
शब्दासहत्वं तन्द्रा च विक्षये+अङ्गशिरोतिरुक्॥22॥
हृत्कण्ठरोगः सम्मोहः कासः+तृष्णा वमिः+ज्वरः।
निवृत्तः+ यः+तु मद्यभ्यः+ जितात्मा बुद्धिपूर्वकृत्॥23॥
विकारैः स्पृश्यते जातु न सः+ शारीरमानसैः।
रजोमोहाहिताहारपरस्य स्युः+त्रयः+ गदाः॥24॥
रसासृक्चेतानावाहिस्रोतोरोधसमुद्भवाः।
मदमूर्च्छायसन्न्यासा यथा+उत्तरबलोत्तराः॥25॥
मदः+अत्र दोषैः सर्वैः+च रक्तमद्यविषैः+अपि।
सक्तानल्पद्रुताभाषः+चलः स्खलितचेष्टितः॥26॥
रूक्षश्यावारुणतनुः+मदे वातोद्भवे भवेत्।
पित्तेन क्रोधनः+ रक्तपीताभः कलहप्रियः॥27॥

स्वल्पसम्बद्धवाक्पाण्डुः कफात्+ध्यानपरः+अलसः।
सर्वात्मा सन्निपातेन रक्तात्+स्तब्धाङ्गदृष्टिता॥28॥
पित्तलिङ्गं च मद्येन विकृतेहास्वराङ्गता।
विषे कम्पः+अतिनिद्रा च सर्वेभ्यः+अभ्यधिकः+तु सः॥29॥
लक्षयेत्+लक्षणोत्कर्षात्+वातादीन् शोणितादिषु।
अरुणं कृष्णनीलं वा खं पश्यन्+प्रविशेत्तमः॥30॥
शीघ्रं च प्रतिबुध्येत हृत्पीडा वेपथुः+भ्रमः।
कार्श्यं श्यावारुणा छाया मूर्च्छाये मारुतात्मके॥31॥
पित्तेन रक्तं पीतं वा नभः पश्यन् विशेत्+तमः।
विबुध्येत च सस्वेदः+ दाहतृट्तापपीडितः॥32॥
भिन्नविट्+नीलपीताभः+ रक्तपीताकुलेक्षणः।
कफेन मेघसंकाशं पश्यन्+आकाशम्+आविशेत्॥33॥
तमः+चिरात्+च बुध्येत सहृल्लासः प्रसेकवान्।
गुरुभिः स्तिमितैः+अङ्गैः+आर्द्रचर्मावनद्धवत्॥34॥
सर्वाकृतिः+त्रिभिः+दोषैः+अपस्मारः+ इव+अपरः।
पातयति+आशु निश्चेष्टं विना बीभत्सचेष्टितैः॥35॥
दोषेषु मदमूर्च्छायाः कृतवेगेषु देहिनाम्।
स्वयम्+एव+उपशाम्यन्ति, सन्न्यासः+ न+औषधैः+विना॥36॥
वाग्देहमनसां चेष्टाम्+आक्षिप्य+अतिबला मलाः।
सन्न्यासं सन्निपतिताः प्राणायतनसंश्रयाः॥37॥
कुर्वन्ति, तेन पुरुषः काष्ठीभूतः+ मृतोपमः।
म्रियेत शीघ्रं शीघ्रं चेत्+चिकित्सा न प्रयुज्यते॥38॥
अगाधे ग्राहबहुले सलिलौघ इव+अतटे।
सन्न्यासे विनिमज्जन्तं नरम्+आशु निवर्तयेत्॥39॥
मदमानरोषतोषप्रभृतिभिः+अरिभिः+निजैः परिष्वङ्गः।
युक्तायुक्तं च समं युक्तिवियुक्तेन मद्येन॥40॥
बलकालदेशसात्म्यप्रकृतिसहायामयवयांसि।
प्रविभज्य तदनुरूपं यदि पिबति ततः पिबति+अमृतम्॥41॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने मदात्ययादिनिदानं नाम षष्ठः+अध्यायः॥6॥

सप्तमः+अध्यायः।

अथ+अतः+अर्शसां निदानं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

अरिवत्+प्राणिनः+ मांसकीलका विशसन्ति यत्।

अर्शांसि तस्मात्+उच्यन्ते गुदमार्गनिरोधतः॥1॥

दोषाः+त्वङ्मांसमेदांसि सन्दूष्य विविधाकृतीन्।

मांसाङ्कुरानपानादौ कुर्वन्ति+अर्शांसि तान् जगुः॥2॥

सहजन्मोत्तरोत्थानभेदात्+द्वेधा समासतः।

शुष्कस्राविविभेदात्+च गुदः स्थूलान्त्रसंश्रयः॥3॥

अर्धपञ्चाङ्गुलः+तस्मिन्+तिस्रः+अध्यर्धाङ्गुलाः स्थिताः।

वल्यः, प्रवाहिणी तासाम्+अन्तर्मध्ये विसर्जनी॥4॥

बाह्या संवरणी तस्या गुदौष्ठः+ बहुः+अङ्गुले।

यवाध्यर्धः प्रमाणेन रोमाणि+अत्र ततः परम्॥5॥

तत्र हेतुः सहोत्थानां वलीबीजोपतप्तता।

अर्शसां, बीजतप्तिः+तु मातापित्रपचारतः॥6॥

दैवात्+च, ताभ्यां कोपः+ हि सन्निपातस्य तानि+अतः।

असाध्यानि+एवम्+आख्याताः सर्वे रोगाः कुलोद्भवाः॥7॥

सहजानि विशेषेण रूक्षदुर्दर्शनानि च।

अन्तर्मुखानि पाण्डूनि दारुणोपद्रवाणि च॥8॥

षोढा+अन्यानि पृथक्+दोषसंसर्गनिचयास्रतः।

शुष्काणि वातश्लेष्मभ्याम्+आर्द्राणि तु+अस्रपित्ततः॥9॥

दोषप्रकोपहेतुः+तु प्राक्+उक्तः+तेन सादिते।

अग्नौ, मले+अतिनिचिते, पुनः+च+अतिव्यवायतः॥10॥

यानसङ्क्षोभविषमकठिनोत्कटकासनात्।

बस्तिनेत्राश्मलोष्ठोर्वीतलचैलादिघट्टनात्॥11॥

भृशं शीताम्बुसंस्पर्शात्+प्रततातिप्रवाहणात्।

वातमूत्रशकृद्वेगधारणात्+तत्+उदीरणात्॥12॥

ज्वरगुल्मातिसारामग्रहणीशोफपाण्डुभिः।

कर्शनात्+विषमाभ्यः+च चेष्टाभ्यः+, योषितां पुनः॥13॥

आमगर्भप्रपतनात्+गर्भवृद्धिप्रपीडनात्।

ईदृशैः+च+अपरैः+वायुः+अपानः कुपितः+ मलम्॥14॥

पायोः+वलीषु तं धत्ते तासु+अभिष्यण्णमूर्तिषु।

जायन्ते+अर्शांसि तत्+पूर्वलक्षणं मन्दवह्निता॥15॥

विष्टम्भः सक्थिसदनं पिण्डिकोद्वेष्टनं भ्रमः।

सादः+अङ्गे नेत्रयोः शोफः शकृत्+भेदः+अथवा ग्रहः॥16॥
मारुतः प्रचुरः+ मूढः प्रायः+ नाभेः+अधः+चरन्।
सरुक् सपरिकर्तः+च कृच्छ्रात्+निर्गच्छति स्वनन्॥17॥
अन्त्रकूजनम्+आटोपः क्षामतोद्गारभूरिता।
प्रभूतं मूत्रमल्पा विडश्रद्धा धूमकः+अम्लकः॥18॥
शिरःपृष्ठोः+असां शूलमालस्यं भिन्नवर्णता।
तन्द्रेन्द्रियाणां दौर्बल्यं क्रोधः+ दुःखोपचारता॥19॥
आशङ्का ग्रहणीदोषपाण्डुगुल्मोदरेषु च।
एतानि+एव विवर्द्धन्ते जातेषु हतनामसु॥20॥
निवर्तमानः+अपानः+ हि तैः+अधोमार्गरोधतः।
क्षोभयन्+अनिलान्+अन्यान् सर्वेन्द्रियशरीरगान्॥21॥
तथा मूत्रशकृत्पित्तकफान् धातून्+च साशयान्।
मृद्गात्यग्निं ततः सर्वः+ भवति प्रायशः+अर्शसः॥22॥
कृशः+ भृशं हतोत्साहः+ दीनः क्षामः+अतिनिष्प्रभः।
असारः+ विगतच्छायः+ जन्तुजुष्टः+ इव द्रुमः॥23॥
कृत्स्नैः+उपद्रवैः+ग्रस्तः+ यथा+उक्तैः+मर्मपीडनैः।
तथा कासपिपासास्यवैरस्यश्वासपीनसैः॥24॥
क्लमाङ्गभङ्गवमथुक्षवथुश्वयथुज्वरैः।
क्लैब्यबाधिर्यतैमिर्यशर्कराश्मरिपीडितः॥25॥
क्षामभिन्नस्वरः+ ध्यायन्+मुहुः ष्ठीवन्+अरोचकी।
सर्वपर्वास्थिहृन्नाभिपायुवङ्क्षणशूलवान्॥26॥
गुदेन स्रवता पिच्छां पुलाकोदकसन्निभाम्।
विबद्धमुक्तं शुष्कार्द्रं पक्वामं च+अन्तरा+अन्तरा॥27॥
पाण्डु पीतं हरिद्रक्तं पिच्छिलं च+उपवेश्यते।
गुदाङ्कुरा बह्वनिलाः शुष्काः+चिमिचिमान्विताः॥28॥
म्लानाः श्यावारुणाः स्तब्धा विषमाः परुषाः खराः।
मिथः+ विसदृशा वक्राः+तीक्ष्णा विस्फुटितानानाः॥29॥
बिम्बीकर्कन्धुखर्जूरकार्पासीफलसन्निभाः।
केचित्+कदम्बपुष्पाभाः केचित्+सिद्धार्थकोपमाः॥30॥
शिरः पार्श्वांसकट्यूरुवङ्क्षणाभ्यधिकव्यथाः।
क्षवथूद्गारविष्टम्भहृद्ग्रहारोचकप्रदाः॥31॥
कासश्वासाग्निवैषम्यकर्णनादभ्रमावहाः।

तैः+आर्तः+ ग्रथितं स्तोकं सशब्दं सप्रवाहिकम्॥32॥

रुक्फेनपिच्छानुगतं विबद्धम्+उपवेश्यते।

कृष्णत्वङ्नखविण्मूत्रनेत्रवक्त्रः+च जायते॥33॥

गुल्मप्लीहोदराष्ठीलासम्भवः+ततः+ एव च।

पित्तोत्तरा नीलमुखा रक्तपीतासितप्रभाः॥34॥

तन्वस्रस्नाविणः+ विस्राः+तनवः+ मृदवः श्लथाः।

शुकजिह्वायकृत्खण्डजलौकोवक्त्रसन्निभाः॥35॥

दाहपाकज्वरस्वेदतृण्मूर्च्छारुचिमोहदाः।

सोष्माणः+ द्रवनीलोष्णपीतरक्ताम्+अवर्चसः॥36॥

यवमध्या हरित्पीतहारिद्रत्वङ्नखादयः।

श्लेष्मोल्बणा महामूला घना मन्दरुजः सिताः॥37॥

उच्छूनोपचिताः स्निग्धाः स्तब्धवृत्तगुरुस्थिराः।

पिच्छिलाः स्तिमिताः श्लक्ष्णाः कण्ड्वाढ्याः स्पर्शनप्रियाः॥38॥

करीरपनसास्थ्याभाः+तथा गोस्तनसन्निभाः।

वङ्क्षणानाहिनः पायुबस्तिनाभिविकर्तिनः॥39॥

सकासश्वासहृल्लासप्रसेकारुचिपीनसाः।

मेहकृच्छ्रशिरोजाड्यशिशिरज्वरकारिणः॥40॥

क्लैब्याग्निमार्दवच्छर्दिरामप्रायविकारदाः।

वसाभसकफप्राज्यपुरीषाः सप्रवाहिकाः॥41॥

न स्रवन्ति न भिद्यन्ते पाण्डुस्निग्धत्वगादयः।

संसृष्टलिङ्गाः संसर्गात् निचयात्+सर्वलक्षणाः॥42॥

रक्तोल्बणा गुदेकीलाः पित्ताकृतिसमन्विताः।

वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः॥43॥

ते+अत्यर्थं दुष्टमुष्णं च गाढविट्प्रतिपीडिताः।

स्रवन्ति सहसा रक्तं तस्य च+अतिप्रवृत्तितः॥44॥

भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः।

हीनवर्णबलोत्साहः+ हतौजाः कलुषेन्द्रियः॥45॥

मुद्गकोद्रवजूर्णाह्वकरीरचणकादिभिः।

रूक्षैः सङ्ग्राहिभिः+वायुः स्वे स्थाने कुपितः+ बलीः॥46॥

अधोवहानि स्रोतांसि संरुध्याधः प्रशोषयन्।

पुरीषं वातविण्मूत्रसङ्गं कुर्वीत दारुणम्॥47॥

तेन तीव्रा रुजा कोष्ठपृष्ठहृत्पार्श्वगा भवेत्।

आध्मानम्+उदरावेष्टः+ हृल्लसः परिकर्तनम्॥48॥
बस्तौ च सुतरां शूलं गण्डश्वयथुसम्भवः।
पवनस्य+ऊर्ध्वगामित्वं ततः+च्छर्द्यरुचिज्वराः॥49॥
हृद्रोगग्रहणीदोषमूत्रसङ्गप्रवाहिकाः।
बाधिर्यतिमिरश्वासशिरोरुक्कासपीनसाः॥50॥
मनोविकारस्तृष्णास्रपित्तगुल्मोदरादयः।
ते ते च वातजा रोगा जायन्ते भृशदारुणाः॥51॥
दुर्नाम्नाम्+इति+उदावर्तः परमः+अयम्+उपद्रवः।
वाताभिभूतकोष्ठानां तैः+विना+अपि सः+ जायते॥52॥
सहजानि त्रिदोषाणि यानि च+अभ्यन्तरे वलौ।
स्थितानि तानि+असाध्यानि, याप्यन्ते+अग्निबलादिभिः॥53॥
द्वन्द्वजानि द्वितीयायां वलौ यानि+आश्रितानि च।
कृच्छ्रसाध्यानि तानि+आहुः परिसंवत्सराणि च॥54॥
बाह्यायां तु वलौ जातानि+एकदोषोल्बणानि च।
अर्शांसि सुखसाध्यानि न चिरोत्पतितानि च॥55॥
मेढ्रादिषु+अपि वक्ष्यन्ते यथास्वं नाभिजानि तु।
गण्डूपदास्यरूपाणि पिच्छिलानि मृदूनि च॥56॥
व्यानः+ गृहीत्वा श्लेष्माणं करोति+अर्शस्त्वचः+ बहिः।
कीलोपमं स्थिरखरं चर्मकीलं तु तं विदुः॥57॥
वातेन तोदः पारुष्यं, पित्तात्+असितरक्तता।
श्लेष्मणा स्निग्धता तस्य ग्रथितत्वं सवर्णता॥58॥
अर्शसां प्रशमे यत्नम्+आशु कुर्वीत बुद्धिमान्।
तानि+आशु हि गुदं बद्ध्वा कुर्युः+बद्धगुदोदरम्॥59॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने+अर्शसां निदानं नाम सप्तमः+अध्यायः॥7॥
अष्टमः+अध्यायः।
अथ+अतः+अतीसारग्रहणीदोषनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
दोषैः+व्यस्तैः समस्तैः+च भयात्+शोकात्+च षड्विधः।
अतीसारः सः+ सुतरां जायते+अत्यम्बुपानतः॥1॥
कृशशुष्कामिषासात्म्यतिलपिष्टविरूढकैः।
मद्यरूक्षातिमात्रान्नैः+अर्शोभिः स्नेहविभ्रमात्॥2॥

कृमिभ्यः+ वेगरोधात्+च तद्विधैः कुपितः+अनिलः।
विस्रंसयति+अधः+अब्धातुं हत्वा तेन+एव च+अनलम्॥3॥
व्यापद्यानुशकृत्कोष्ठं पुरीषं द्रवतां नयन्।
प्रकल्पते+अतिसाराय लक्षणं तस्य भाविनः॥4॥
तोदः+ हृद्गुदकोष्ठेषु गात्रसादः+ मलग्रहः।
आध्मानम्+अविपाकः+च तत्र वातेन विड्जलम्॥5॥
अल्पाल्पं शब्दशूलाढ्यं विबद्धम्+उपवेश्यते।
रूक्षं सफेनम्+अच्छं च ग्रथितं वा मुहुः+मुहुः॥6॥
तथा दग्धगुडाभासं सपिच्छापरिकर्तिकम्।
शुष्कास्यः+ भ्रष्टपायुः+च हृष्टरोमा विनिष्टनन्॥7॥
पित्तेन पीतमसितं हारिद्रं शाद्वलप्रभम्।
सरक्तमतिदुर्गन्धं तृणमूर्च्छास्वेददाहवान्॥8॥
सशूलं पायुसन्तापपाकवान् श्लेष्मणा घनम्।
पिच्छिलं तन्तुम्+अच्छ्वेतं स्निग्धम्+आमं कफान्वितम्॥9॥
अभीक्ष्णं गुरु दुर्गन्धं विबद्धम्+अनुबद्धरुक्।
निद्रालुः+अलसः+अन्नद्विट्+अल्पाल्पं सप्रवाहिकम्॥10॥
सरोमहर्षः सोत्क्लेशः+ गुरुबस्तिगुदोदरः।
कृते+अपि+अकृतसंज्ञः+च सर्वात्मा सर्वलक्षणः॥11॥
भयेन क्षोभिते चित्ते सपित्तः+ द्रावयेत्+शकृत्।
वायुः+ततः+अतिसार्येत क्षिप्रम्+उष्णं द्रवं प्लवम्॥12॥
वातपित्तसमं लिङ्गैः+आहुः तद्वत्+च शोकतः।
अतीसारः समासेन द्विधा सामः+ निरामकः॥13॥
सासृङ्+निरस्रः तत्र+आद्ये गौरवात्+अप्सु मज्जति।
शकृद्दुर्गन्धमाटोपविष्टम्भार्तिप्रसेकिनः॥14॥
विपरीतः+ निरामः+तु कफात्+पक्वः+अपि मज्जति।
अतीसारेषु यः+ न+अतियत्नवान् ग्रहणीगदः॥15॥
तस्य स्यात्+अग्निविध्वंसकरैः+अन्यस्य सेवितैः।
सामं शकृत्+निरामं वा जीर्णे येन+अतिसार्यते॥16॥
सः+अतिसारः+अतिसरणात्+आशुकारी स्वभावतः।
सामं सान्नम्+अजीर्णे+अन्ने जीर्णे पक्वं तु न+एव वा॥17॥
अकस्मात्+वा मुहुः+बद्धम्+अकस्मात्+शिथिलं मुहुः।
चिरकृद्ग्रहणीदोषः सञ्चयात्+च+उपवेशयेत्॥18॥

स चतुर्धा पृथक्+दोषैः सन्निपातात्+च जायते।
प्राग्रूपं तस्य सदनं चिरात्+पचनम्+अम्लकः॥19॥
प्रसेकः+ वक्त्रवैरस्यमरुचिः+तृट् क्लमः+ भ्रमः।
आनद्धोदरता छर्दिः कर्णक्ष्वेडः+अन्त्रकूजनम्॥20॥
सामान्यं लक्षणं कार्श्यं धूमकः+तमकः+ ज्वरः।
मूर्च्छा शिरोरुग्विष्टम्भः श्वयथुः करपादयोः॥21॥
तत्र+अनिलात्+तालुशोषः+तिमिरं कर्णयोः स्वनः।
पार्श्वोरुवङ्क्षणग्रीवारुजा+अभीक्ष्णं विषूचिका॥22॥
रसेषु गृद्धिः सर्वेषु क्षुत्तृष्णा परिकर्तिका।
जीर्णे जीर्यति च+आध्मानं भुक्ते स्वास्थ्यं समश्नुते॥23॥
वातहृद्रोगगुल्मार्शः प्लीहपाण्डुत्वशङ्कितः।
चिरात्+दुःखं द्रवं शुष्कं तन्वामं शब्दफेनवत्॥24॥
पुनः पुनः सृजेत्+वर्चः पायुरुक्श्वासकासवान्।
पित्तेन नीलपीताभं पीताभः सृजति द्रवम्॥25॥
पूत्यम्लोद्गारहृत्कण्ठदाहारुचितृडर्दितः।
श्लेष्मणा पच्यते दुःखम्+अन्नं छर्दिररोचकः॥26॥
आस्योपदेहनिष्ठीवकासहृल्लासपीनसाः।
हृदयं मन्यते स्त्यानम्+उदरं स्तिमितं गुरु॥27॥
उद्गारः+ दुष्टमधुरः सदनं स्त्रीषु+अवहर्षणम्।
भिन्नाम्+अश्लेष्मसंसृष्टगुरुवर्चः प्रवर्तनम्॥28॥
अकृशस्य+अपि दौर्बल्यम् सर्वजे सर्वसङ्करः।
विभागे+अङ्गस्य ये च+उक्ता विषमाद्याः+त्रयः+अग्नयः॥29॥
ते+अपि स्युः+ग्रहणीदोषाः समस्तु स्वास्थ्यकारणम्।
वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः।
अर्शांसि ग्रहणी+इति+अष्टौ महारोगाः सुदुस्तराः॥30॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये
निदानस्थाने+अतीसारग्रहणीदोषनिदानं नामाष्टमः+अध्यायः॥8॥
नवमः+अध्यायः।
अथ+अतः+ मूत्राघातनिदानं व्यख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
बस्तिबस्तिशिरोमेढ्रकटीवृषणपायवः।
एकसम्बन्धनाः प्रोक्ता गुदास्थिविवराश्रयाः॥1॥

अधोमुखः+अपि बस्तिः+हि मूत्रवाहिसिरामुखैः।
पार्श्वेभ्यः पूर्यते सूक्ष्मैः स्यन्दमानैः+अनारतम्॥2॥
यैः+तैः+एव प्रविश्य+एनं दोषाः कुर्वन्ति विंशतिम्।
मूत्राघातान् प्रमेहान्+च कृच्छ्रान्+मर्मसमाश्रयान्॥3॥
बस्तिवङ्क्षणमेढ्रार्तियुक्तः+अल्पाल्पं मुहुः+मुहुः।
मूत्रयेत्+वातजे कृच्छ्रे पैत्ते पीतं सदाहरुक्॥4॥
रक्तं वा कफजे बस्तिमेढ्रगौरवशोफवान्।
सपिच्छं सविबन्धं च सर्वैः सर्वात्मकं मलैः॥5॥
यदा वायुः+मुखं बस्तेः+आवृत्य परिशोषयेत्।
मूत्रं सपित्तं सकफं सशुक्रं वा तदा क्रमात्॥6॥
सञ्जायते+अश्मरी घोरा पित्तात्+गोः+इव रोचना।
श्लेष्माश्रया च सर्वाः+ स्यात् अथास्याः पूर्वलक्षणम्॥7॥
बस्त्याध्मानं तदा+आसन्नदेशेषु परितः+अतिरुक्।
मूत्रे च बस्तगन्धत्वं मूत्रकृच्छ्रं ज्वरः+अरुचिः॥8॥
सामान्यलिङ्गं रुङ्नाभिसेवनीबस्तिमूर्धसु।
विशीर्णधारं मूत्रं स्यात्+तया मार्गनिरोधने॥9॥
तद्व्यपायात्+सुखं मेहेत्+अच्छं गोमेदकोपमम्।
तत्+सङ्क्षोभात्+क्षते सास्रमायासाच्चातिरुगक्+भवेत्॥10॥
तत्र वातात्+भृशात्यर्तिः+ दन्तान् खादति वेपते।
मृद्गाति मेहनं नाभिं पीडयति+अनिशं क्वणन्॥11॥
सानिलं मुञ्चति शकृत्+मुहुः+मेहति बिन्दुशः।
श्यावा रुक्षा+अश्मरी च+अस्य स्यात्+चिता कण्टकैः+इव॥12॥
पित्तेन दह्यते बस्तिः पच्यमानः+ इव+ऊषमवान्।
भल्लातकास्थिसंस्थाना रक्ता पीता+असिता+अश्मरी॥13॥
बस्तिः+निस्तुद्यतः+ इव श्लेष्मणा शीतलः+ गुरुः।
अश्मरी महती श्लक्ष्णा मधुवर्णा+अथवा सिता॥14॥
एता भवन्ति बालानां तेषाम्+एव च भूयसा।
आश्रयोपचयाल्पत्वात्+ग्रहणाहरणे सुखाः॥15॥
शुक्राश्मरी तु महतां जायते शुक्रधारणात्।
स्थानाच्च्युतम्+अमुक्तं हि मुष्कयोः+अन्तरे+अनिलः॥16॥
शोषयति+उपसङ्गृह्य शुक्रं तत्+शुष्कमश्मरी।
बस्तिरुक्कृच्छ्रमूत्रत्वमुष्कश्वयथुकारिणी॥17॥

तस्याम्+उत्पन्नमात्रायां शुक्रम्+एति विलीयते।
पीडिते तु+अवकाशे+अस्मिन् अश्मरि+एव च शर्करा॥18॥
अणुशः+ वायुना भिन्ना सा तु+अस्मिन्+अनुलोमगे।
निरेति सह मूत्रेण प्रतिलोमे विबध्यते॥19॥
मूत्रसन्धारिणः कुर्यात्+रुद्ध्वा बस्तेः+मुखं मरुत्।
मूत्रसङ्गं रुजं कण्डूं कदाचित्+च स्वधामतः॥20॥
प्रच्याव्य बस्तिम्+उद्वृत्तं गर्भाभं स्थूलविप्लुतम्।
करोति तत्र रुग्दाहस्पन्दनोद्वेष्टनानि च॥21॥
बिन्दुशः+च प्रवर्तेत मूत्रं बस्तौ तु पीडिते।
धारया द्विविधः+अपि+एषः+ वातबस्तिः+इति स्मृतः॥22॥
दुस्तरः+ दुस्तरतरः+ द्वितीयः प्रबलानिलः।
शकृन्मार्गस्य बस्तेः+च वायुः+अन्तरम्+आश्रितः॥23॥
अष्ठीलाभं घनं ग्रन्थिं करोति+अचलम्+उन्नतम्।
वाताष्ठीला+इति सा+आध्मानविष्मूत्रानिलसङ्गकृत्॥24॥
विगुणः कुण्डलीभूतः+ बस्तौ तीव्रव्यथः+अनिलः।
आविध्यं मूत्रं भ्रमति सस्तम्भोद्वेष्टगौरवः॥25॥
मूत्रम्+अल्पाल्पम्+अथवा विमुञ्चति शकृत्सृजन्।
वातकुण्डलिका+इति+एषा मूत्रं तु विधृतं चिरम्॥26॥
न निरेति विबद्धं वा मूत्रातीतं तदल्परुक्।
विधारणात्+प्रतिहतं वातोदौ+अर्तितं यदा॥27॥
नाभेः+अधस्तात्+उदरं मूत्रम्+आपूरयेत्+तदा।
कुर्यात्+तीव्ररुगाध्मानम्+अपक्तिं मलसङ्ग्रहम्॥28॥
तन्मूत्रजठरम् छिद्रवैगुण्येन+अनिलेन वा।
आक्षिप्तम्+अल्पं मूत्रं तद्बस्तौ नाले+अथवा मणौ॥29॥
स्थित्वा स्रवेत्+शनैः पश्चात्+सरुजं वा+अथ नीरुजम्।
मूत्रोत्सङ्गः सः+ विच्छिन्नतच्छेषगुरुशेफसः॥30॥
अन्तर्बस्तिमुखे वृत्तः स्थिरः+अल्पः सहसा भवेत्।
अश्मरीतुल्यरुक् ग्रन्थिः+मूत्रग्रन्थिः सः+ उच्यते॥31॥
मूत्रितस्य स्त्रियं यातः+ वायुना शुक्रम्+उद्धतम्।
स्थानात्+च्युतं मूत्रयतः प्राक् पश्चात्+वा प्रवर्तते॥32॥
भस्मोदकप्रतीकाशं मूत्रशुक्रं तत्+उच्यते।
रूक्षदुर्बलयोः+वातादौ+आवर्तं शकृत्+यदा॥33॥

मूत्रस्रोतः+अनुपर्येति संसृष्टं शकृता तदा।

मूत्रं विट्तुल्यगन्धं स्यात्+विड्विघातं तम्+आदिशेत्॥34॥

पित्तं व्यायामतीक्ष्णोष्णभोजनाध्वातपादिभिः।

प्रवृद्धं वायुना क्षिप्तं बस्त्युपस्थार्तिदाहवत्॥35॥

मूत्रं प्रवर्तयेत्+पीतं सरक्तं रक्तम्+एव वा।

उष्णं पुनःपुनः कृच्छ्रात्+उष्णवातं वदन्ति तम्॥36॥

रूक्षस्य क्लान्तदेहस्य बस्तिस्थौ पित्तमारुतौ।

मूत्रक्षयं सरुग्दाहं जनयेतां तदाह्वयम्॥37॥

पित्तं कफः+ द्वौ+अपि वा संहन्येते+अनिलेन चेत्।

कृच्छ्रात्+मूत्रं तदा पीतं रक्तं श्वेतं घनं सृजेत्॥38॥

सदाहं रोचनाशङ्खचूर्णवर्णं भवेत्+च तत्।

शुष्कं समस्तवर्णं वा मूत्रसादं वदन्ति तम्॥39॥

इति विस्तरतः प्रोक्ता रोगा मूत्राप्रवृत्तिजाः।

निदानलक्षणैः+ऊर्ध्वं वक्ष्यन्ते+अतिप्रवृत्तिजाः॥40॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने मूत्राघातनिदानं नाम नवमः+अध्यायः॥9॥

दशमः+अध्यायाः।

अथ+अतः प्रमेहनिदानं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

प्रमेहा विंशतिः+तत्र श्लेष्मतः+ दश, पित्ततः।

षट्, चत्वारः+अनिलात् तेषां मेदोमूत्रकफावहम्॥1॥

अन्नपानक्रियाजातं यत्+प्रायः+तत्+प्रवर्तकम्।

स्वाद्वम्ललवणस्निग्धगुरुपिच्छिलशीतलम्॥2॥

नवधान्यसुरानूपमांसेक्षुगुडगोरसम्।

एकस्थानासनरतिः शयनं विधिवर्जितम्॥3॥

बस्तिम्+आश्रित्य कुरुते प्रमेहान् दूषितः कफः।

दूषयित्वा वपुः क्लेदस्वेदमेदोरसामिषम्॥4॥

पित्तं रक्तम्+अपि क्षीणे कफादौ मूत्रसंश्रयम्।

धातून् बस्तिम्+उपानीय तत्+क्षये+अपि च मारुतः॥5॥

साध्यया+अपि+अपरित्याज्या मेहाः+तेन+एव तद्भवाः।

समासमक्रियतया महात्ययतया+अपि च॥6॥

सामान्यं लक्षणं तेषां प्रभूताविलमूत्रता।

दोषदूष्याविशेषे+अपि तत्+संयोगविशेषतः॥7॥
मूत्रवर्णादिभेदेन भेदः+ मेहेषु कल्प्यते।
अच्छं बहु सितं शीतं निर्गन्धम्+उदकोपमम्॥8॥
मेहति+उदकमेहेन किञ्चित्+च+आविलपिच्छिलम्।
इक्षः+ रसम्+इव+अत्यर्थं मधुरं च+इक्षुमेहतः॥9॥
सान्द्रीभवेत्+पर्युषितं सान्द्रमेहेन मेहति।
सुरामेही सुरातुल्यम्+उपर्यच्छम्+अधः+ घनम्॥10॥
संहृष्टरोमा पिष्टेन पिष्टवत्+बहलं सितम्।
शुक्राभं शुक्रमिश्रं वा शुक्रमेही प्रमेहति॥11॥
मूर्ताणून् सिकतामेही सिकतारूपिणः+ मलान्।
शीतमेही सुबहुशः+ मधुरं भृशशीतलम्॥12॥
शनैः शनैः शनैः+मेही मन्दं मन्दं प्रमेहति।
लालातन्तुयुतं मूत्रं लालामेहेन पिच्छिलम्॥13॥
गन्धवर्णरसस्पर्शैः क्षारेण क्षारतोयवत्।
नीलमेहेन नीलाभं कालमेही मषीनिभम्॥14॥
हारिद्रमेही कटुकं हरिद्रासन्निभं दहत्।
विस्रं माञ्जिष्ठमेहेन मञ्जिष्ठासलिलोपमम्॥15॥
विस्रम्+उष्णं सलवणं रक्ताभं रक्तमेहतः।
वसामेही वसामिश्रं वसां वा मूत्रयेत्+मुहुः।16॥
मज्जानं मज्जमिश्रं वा मज्जमेही मुहुः+मुहुः।
हस्ती मत्त इव+अजस्रं मूत्रं वेगविवर्जितम्॥17॥
सलसीकं विबद्धं च हस्तिमेही प्रमेहति।
मधुमेही मधुसमं जायते सः+ किल द्विधा॥18॥
क्रुद्धे धातुक्षयाद्+वायौ दोषावृतपथे+अथवा।
आवृतः+ दोषलिङ्गानि सः+अनिमित्तं प्रदर्शयेत्॥19॥
क्षीणः क्षणात्+क्षणात् पूर्णः+ भजते कृच्छ्रसाध्यताम्।
कालेन+उपेक्षिताः सर्वे यद्यान्ति मधुमेहताम्॥20॥
मधुरं यत्+च सर्वेषु प्रायः+ मधु+इव मेहति।
सर्वे+अपि मधुमेहाख्या माधुर्यात्+च तनोः+अतः॥21॥
अविपाकः+अरुचिः+च्छर्दिः+निद्रा कासः सपीनसः।
उपद्रवाः प्रजायन्ते मेहानां कफजन्मनाम्॥22॥
बस्तिमेहनयोः+तोदः+ मुष्कावदरणं ज्वरः।

दाहस्तृष्णा+अम्लकः+ मूर्च्छा विड्भेदः पित्तजन्मनाम् ॥23॥

वातिकानाम्+उदावर्तकम्पहृद्ग्रहलोलताः।

शूलम्+उन्निद्रता शोषः कासः श्वासः+च जायते॥24॥

शराविका कच्छपिका जालिनी विनता+अलजी।

मसूरिका सर्षपिका पुत्रिणी सविदारिका॥25॥

विद्रधिः+च+इति पिटिकाः प्रमेहोपेक्षया दश।

सन्धिमर्मसु जायन्ते मांसलेषु च धामसु॥26॥

अन्तोन्नता मध्यनिम्ना श्यावा क्लेदरुजान्विता।

शरावमानसंस्थानां पिटिका स्यात्+शराविका॥27॥

अवगाढार्तिनिस्तोदा महावस्तुपरिग्रहा।

श्लक्ष्मा कच्छपपृष्ठाभा पिटिका कच्छपी मता॥28॥

स्तब्धा सिराजालवती स्निग्धस्रावा महाशया।

रुजानिस्तोदबहुला सूक्ष्मच्छिद्रा च जालिनी॥29॥

अवगाढरुजाक्लेदा पृष्ठे वा जठरे+अपि वा।

महती पिटिका नीला विनता विनता स्मृताः॥30॥

दहति त्वचम्+उत्थाने भृशं कष्टा विसर्पिणी।

रक्तकृष्णा+अतितृट्स्फोटदाहमोहज्वरा+अलजी॥31॥

मानसंस्थानयोः+तुल्या मसूरेण मसूरिका।

सर्षपामानसंस्थाना क्षिप्रपाका महारुजा॥32॥

सर्षपी सर्षपातुल्यपिटिकापरिवारिता।

पुत्रिणी महती भूरिसुसूक्ष्मपिटिकाचिता॥33॥

विदारीकन्दवत्+वृत्ता कठिना च विदारिका।

विद्रधिः+वक्ष्यते+अन्यत्र तत्र+आद्यं पिटिकात्रयम्॥34॥

पुत्रिणी च विदारी च दुःसहा बहुमेदसः।

सह्याः पित्तोल्बणाः+तु+अन्याः सम्भवन्ति+अल्पमेदसः॥35॥

तासु मेहवशात्+च स्यात्+दोषोद्रेकः+ यथायथम्।

प्रमेहेण विना+अपि+एता जायन्ते दुष्टमेदसः।

तावत्+च न+उपलक्ष्यन्ते यावत्+वस्तुपरिग्रहः॥36॥

हारिद्रवर्णं रक्तं वा मेहप्राग्रूपवर्जितम्।

यः+ मूत्रयेत्+न तं मेहं रक्तपित्तं तु तत्+विदुः॥37॥

स्वेदः+अङ्गगन्धः शिथिलत्वम्+अङ्गे

शय्यासनस्वप्नसुखाभिषङ्गः।

हृन्नेत्रजिह्वाश्रवणोपदेहः+
घनाङ्गता केशनखातिवृद्धिः॥38॥
शीतप्रियत्वं गलतालुशोषो
माधुर्यम्+आस्ये करपाददाहः।
भविष्यतः+ मेहगणस्य रूपं
मूत्रे+अभिधावन्ति पिपीलिकाः+च॥39॥
दृष्ट्वा प्रमेहं मधुरं सपिच्छं मधूपमं स्यात्+दूविधः+ विचारः।
सम्पूरणात्+वा कफसम्भवाः स्यात् क्षीणेषु दोषेष्वनिलात्मकः+ वा॥40॥
सपूर्वरूपाः कफपित्तमेहाः क्रमेण ये वातकृताः+च मेहाः।
साध्या न ते, पित्तकृताः+तु याप्याः साध्याः+तु मेदः+ यदि न+अतिदुष्टम्॥41॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने प्रमेहनिदानं नाम दशमः+अध्यायः॥10॥
एकादशः+अध्यायः।
अथ+अतः+ विद्रधिवृद्धिगुल्मनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
भुक्तैः पर्युषितात्युष्णरुक्षशुष्कविदाहिभिः।
जिह्मशय्याविचेष्टाभिः+तैः+तैः+च+असृक्+प्रदूषणैः॥1॥
दुष्टत्वाङ्मांसमेदोस्थिस्नाय्वसृक्कण्डराश्रयः।
यः शोफः+ बहिरन्तः+वा महामूलः+ महारुजः॥2॥
वृत्तः स्यात्+आयतः+ यः+ वा स्मृतः षोढा सः+ विद्रधिः।
दोषैः पृथक्+समुदितैः शोणितेन क्षतेन च॥3॥
बाह्यः+अत्र तत्र तत्र+अङ्गे दारुणः+ ग्रथितोन्नतः।
आन्तरः+ दारुणतरः+ गम्भीरः+ गुल्मवद्धनः॥4॥
वल्मीकवत्+समुच्छ्रायी शीघ्रघात्यग्निशस्त्रवत्।
नाभिबस्तियकृत्प्लीहक्लोमहृत्कुक्षिवङ्क्षणे॥5॥
स्यात्+वृक्कयोः+अपाने च वातात्+तत्र+अतितीव्ररुक्।
श्यावारुणः+चिरोत्थानपाकः+ विषमसंस्थितिः॥6॥
व्यधच्छेदभ्रमानाहस्पन्दसर्पणशब्दवान्।
रक्तताम्रासितः पित्तात्+तृण्मोहज्वरदाहवान्॥7॥
क्षिप्रोत्थानप्रपाकः+च पाण्डुः कण्डूयुतः कफात्।
सोत्क्लेशशीतकस्तम्भजृम्भारोचकगौरवः॥8॥
चिरोत्थानविपाकः+च सङ्कीर्णः सन्निपाततः।

सामाथ्यात्+च+अत्र विभजेत्+बाह्याभ्यन्तरलक्षणम्॥9॥
कृष्णस्फोटावृतः श्यावः+तीव्रदाहरुजाज्वरः।
पित्तलिङ्गः+असृजा बाह्यः स्त्रीणाम्+एव तथा+आन्तरः॥10॥
शस्त्राद्यैः+अभिघातेन क्षते वा+अपथ्यकारिणः।
क्षतोष्मा वायुविक्षिप्तः सरक्तं पित्तम्+ईरयन्॥11॥
पित्तासृग्लक्षणं कुर्यात्+विद्रधिं भूर्युपद्रवम्।
तेषु+उपद्रवभेदः+च स्मृतः+अधिष्ठानभेदतः॥12॥
नाभ्यां हिध्मा, भवेत्+बस्तौ मूत्रं कृच्छ्रेण पूति च।
श्वासः+ यकृति, रोधः+तु प्लीह्नि+उच्छ्वासस्य, तृट् पुनः॥13॥
गलग्रहः+च क्लोम्नि, स्यात्+सर्वाङ्गप्रग्रहः+ हृदि।
प्रमोहः+तमकः कासः+ हृदये घट्टनं व्यथा॥14॥
कुक्षिपार्श्वान्तरांसार्तिः कुक्षावाटोपजन्म च।
सक्थ्नोः+ग्रहः+ वङ्क्षणयोः+वृक्कयोः कटिपृष्ठयोः॥15॥
पार्श्वयोः+च व्यथा पायौ पवनस्य निरोधनम्।
आमपक्वविदग्धत्वं तेषां शोफवत्+आदिशेत्॥16॥
नाभेः+ऊर्ध्वं मुखात्+पक्वाः प्रस्रवन्ति+अधरे गुदात्।
गुदास्य+अन्नाभिजः+ विद्यत्+दोषं क्लेदात्+च विद्रधौ॥17॥
यथास्वं व्रणवत् तत्र विवर्ज्यः सन्निपातजः।
पक्वः+ हृन्नाभिबस्तिस्थः+ भिन्नः+अन्तर्बहिः+एव वा॥18॥
पक्वः+च+अन्तः स्रवन् वक्त्रात् क्षीणस्य+उपद्रवान्वितः।
एवम्+एव स्तनसिरा विवृताः प्राप्य योषिताम्॥19॥
सूतानां गर्भिणीनां वा सम्भवेत्+श्वयथुः+घनः।
स्तने सदुग्धे+अदुग्धे वा बाह्यविद्रधिलक्षणः॥20॥
नाडीनां सूक्ष्मवक्त्रत्वात्+कन्यानां न सः+ जायते।
क्रुद्धः+ रुद्धगतिः+वायुः शोफशूलकरः+चरन्॥21॥
मुष्कौ वङ्क्षणतः प्राप्य फलकोशाभिवाहिनीः।
प्रपीड्य धमनीः+वृद्धिं करोति फलकोशयोः॥22॥
दोषास्रमेदोमूत्रान्त्रैः सः+ वृद्धिः सप्तधा गदः।
मूत्रान्त्रजावप्यनिलादत्+हेतुभेदः+तु केवलम्॥23॥
वातपूर्णदृतिस्पर्शः+ रूक्षः+ वातात्+अहेतुरुक्।
पक्वोदुम्बरसङ्काशः पित्तात्+दाहोष्मपाकवान्॥24॥
कफात्+शीतः+ गुरुः स्निग्धः कण्डूमान् कठिनः+अल्परुक्

कृष्णस्फोटावृतः पित्तवृद्धिलिङ्गः+च रक्ततः॥25॥
कफवत्+मेदसा वृद्धिः+मृदुः+तालफलोपमः।
मूत्रधारणशीलस्य मूत्रजः सः+ तु गच्छतः॥26॥
अम्भोभिः पूर्णदृतिवत्+क्षोभं याति सरुक्+मृदुः।
मूत्रकृच्छ्रम्+अधस्तात्+च वलयं फलकोशयोः॥27॥
वातकोपिभिराहारैः शीततोयावगाहनैः।
धारणेरणभाराध्वविषमाङ्गप्रवर्तनैः।28॥
क्षोभणैः क्षुभितः+अन्यैः+च क्षुद्रान्त्रावयवं यदा।
पवनः+ विगुणीकृत्य स्वनिवेशात्+अधः+ नयेत्॥29॥
कुर्यात्+वङ्क्षणसन्धिस्थः+ ग्रन्थ्याभं श्वयथुं तदा।
उपेक्ष्यमाणस्य च मुष्कवृद्धिमाध्यानरुक्स्तम्भवतीं सः+ वायुः।
प्रपीडितः+अन्तः स्वनवान् प्रयाति प्रध्मापयन्+एति पुनः+च मुक्तः॥30॥
अन्त्रवृद्धिः+असाध्यः+अयं वातवृद्धिसमाकृतिः॥31॥
रूक्षकृष्णारुणसिरातन्तुजालगवाक्षितः।
गुल्मः+अष्टधा पृथक्+दोषैः संसृष्टैः+निचयं गतैः॥32॥
आर्तवस्य च दोषेण नारीणां जायते+अष्टमः।
ज्वरच्छर्द्यतिसाराद्यैः+वमनाद्यैः+च कर्मभिः॥33॥
कर्शितः+ वातलानि+अत्ति शीतं वा+अम्बु बुभुक्षितः।
यः पिबति+अनु च+अन्नानि लङ्घनप्लवनादिकम्॥34॥
सेवते देहसङ्क्षोभि छर्दिं वा समुदीरयेत्।
अनुदीर्णाम्+उदीर्णान्+वा वातादीन्+न विमुञ्चति॥35॥
स्नेहस्वेदावनभ्यस्य शोधनं वा निषेवते।
शुद्धे वा+आशु विदाहीनि भजते स्यन्दनानि वा॥36॥
वातोल्बणाः+तस्य मलाः पृथक् क्रुद्धा द्विशः+अथवा।
सर्वे वा रक्तयुक्ता वा महास्रोतोनुशायिनः॥37॥
ऊर्ध्वाधोमार्गम्+आवृत्य कुर्वते शूलपूर्वकम्।
स्पर्शोपलभ्यं गुल्माख्यम्+उत्प्लुतं ग्रन्थिरूपिणम्॥38॥
कर्शनात्+कफविट्पित्तैः+मार्गस्य+आवरणेन वा।
वायुः कृताश्रयः कोष्ठे रौक्ष्यात्+काठिन्यम्+गतः॥39॥
स्वतन्त्रः स्वाश्रये दुष्टः परतन्त्रः पराश्रये।
पिण्डितत्वात्+अमूर्तः+अपि मूर्तत्वम्+इव संश्रितः॥40॥
गुल्म इति+उच्यते बस्तिनाभिहृत्पार्श्वसंश्रयः।

वातान्+मन्याशिरःशूलं ज्वरप्लीहान्त्रकूजनम्॥41॥

व्यधः सूच्या+एव विट्सङ्गः कृच्छ्रात्+उच्छ्वसनं मुहुः।

स्तम्भः+ गात्रे मुखे शोषः कार्श्यं विषमवह्निता॥42॥

रूक्षकृष्णत्वगादित्वं चलत्वात्+अनिलस्य च।

अनिरूपितसंस्थानस्थानवृद्धिक्षयव्यथः॥43॥

पिपीलिकाव्याप्तः+ इव गुल्मः स्फुरति तुद्यते।

पित्तात्+दाहः+अम्लकः+ मूर्च्छाविड्भेदस्वेदतृड्ज्वराः॥44॥

हारिद्रत्वं त्वगाद्येषु गुल्मः+च स्पर्शनासहः।

दूयते दीप्यते सोष्मा स्वस्थानं दहति+इव च॥45॥

कफात्+स्तैमित्यम्+अरुचिः सदनं शिशिरज्वरः।

पीनसालस्यहृल्लासकासशुक्लत्वगादिताः॥46॥

गुल्मः+अवगाढः कठिनः+ गुरुः सुप्तः स्थिरः+अल्परुक्।

स्वदोषस्थानधामानः स्वे स्वे काले च रुक्कराः॥47॥

प्रायः त्रयः+तु द्वन्द्वोत्था गुल्माः संसृष्टलक्षणाः।

सर्वजः+तीव्ररुग्दाहः शीघ्रपाकी घनोन्नतः॥48॥

सः+असाध्यः+ रक्तगुल्मः+तु स्त्रिया एव प्रजायते।

ऋतौ वा नवसूता वा यदि वा योनिरोगिणी॥49॥

सेवते वातलानि स्त्री क्रुद्धः+तस्याः समीरणः।

निरुणद्धि+आर्तवं योन्यां प्रतिमासम्+अवस्थितम्॥50॥

कुक्षिं करोति तद्गर्भलिङ्गम्+आविष्करोति च।

हृल्लासदौहृदस्तन्यदर्शनक्षामतादिकम्॥51॥

क्रमेण वायुसंसर्गात्+पित्तयोनितया च तत्।

शोणितं कुरुते तस्याः+ वातपित्तोत्थगुल्मजान्॥52॥

रुक्स्तम्भदाहातीसारतृड्ज्वरादीनुपद्रवान्।

गर्भाशये च सुतारं शूलं दुष्टासृगाश्रये॥53॥

योन्याः+च स्रावदौर्गन्ध्यतोदस्पन्दनवेदनाः।

न च+अङ्गैः+गर्भवद्गुल्मः स्फुरति+अपि तु शूलवान्॥54॥

पिण्डीभूतः सः+ एवास्याः कदाचित्+स्पन्दते चिरात्।

न च+अस्याः+ वर्द्धते कुक्षिः+गुल्मः+ एव तु वर्द्धते॥55॥

स्वदोषसंश्रयः+ गुल्मः सर्वः+ भवति तेन सः।

पाकं चिरेण भजते न+एव वा, विद्रधिः पुनः॥56॥

पच्यते शीघ्रम्+अत्यर्थं दुष्टरक्ताश्रयत्वतः।

अतः शीघ्रविदाहित्वात्+विद्रधिः सः+अभिधीयते॥57॥

गुल्मे+अन्तराश्रये बस्तिकुक्षिहृत्प्लीहवेदनाः।

अग्निवर्णबलभ्रंशः+ वेगानां च+अप्रवर्तनम्॥58॥

अतः+ विपर्ययः+ बाह्ये कोष्ठाङ्गेषु तु न+अतिरुक्।

वैवर्ण्यम्+अवकाशस्य बहिः+उन्नतता+अधिकम्॥59॥

साटोपम्+अत्युग्ररुजम्+आध्मानम्+उदरे भृशम्।

ऊर्ध्वाधोवातरोधेन तमानाहं प्रचक्षते॥60॥

घनः+अष्ठीलोपमः+ ग्रन्थिः+अष्ठीलोर्ध्वं समुन्नतः।

आनाहलिङ्गः+तिर्यक्+तु प्रत्यष्ठीला तदा+आकृतिः॥61॥

पक्वाशयात्+गुदोपस्थं वायुः+तीव्ररजः प्रयान्।

तूनी, प्रतूनी तु भवेत्+सः+ एव+अतः+ विपर्यये॥62॥

उद्गारबाहुल्यपुरीषबन्धतृप्त्यक्षमत्वान्त्रविकूजनानि।

आटोपमाध्मानमपक्तिशक्तिमासन्नगुल्मस्य वदन्ति चिह्नम्॥63॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने विद्रधिवृद्धिगुल्मनिदानं नाम+एकादशः+अध्यायः॥11॥

द्वादशः+अध्यायः।

अथ+अतः+ उदरनिदानं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

रोगाः सर्वे+अपि मन्दे+अग्नौ सुतराम्+उदराणि तु।

अजीर्णात्+मलिनैः+च+अन्नैः+जायन्ते मलसञ्चयात्॥1॥

ऊर्ध्वाधः+ धातवः+ रुद्ध्वा वाहिनीः+अम्बुवाहिनीः।

प्राणाग्न्यपानान् सन्दूष्य कुर्युः+त्वङ्मांससन्धिगाः॥2॥

आध्माप्य कुक्षिम्+उदरम् अष्टधा तत्+च भिद्यते।

पृथक्+दोषैः समस्तैः+च प्लीहबद्धक्षतोदकैः॥3॥

तेनार्ताः शुष्कताल्वोष्ठाः शूनपादकरोदराः।

नष्टचेष्टाबलाहाराः कृशाः प्रध्मातकुक्षयः॥4॥

स्युः प्रेतरूपाः पुरुषाः भाविनः+तस्य लक्षणम्।

क्षुत्+नाशः+अन्नं चिरात्+सर्वं सविदाहं च पच्यते॥5॥

जीर्णाजीर्णं न जानाति सौहित्यं सहते न च।

क्षीयते बलतः शश्वत्+श्वसित्यल्पे+अपि चेष्टिते॥6॥

वृद्धिः+विशः+अप्रवृत्तिः+च किञ्चित्+शोफः+च पादयोः।

रुग्बस्तिसन्धौ ततता लघ्वल्पाभोजनैः+अपि॥7॥

राजीजन्म वलीनाशः+ जठरे जठरेषु तु।
सर्वेषु तन्द्रा सदनं मलसङ्गः+अल्पवह्निता॥8॥
दाहः श्वयथुः+आध्मानम्+अन्ते सलिलसम्भवः।
सर्वं त्वतोयम्+अरुणम्+अशोफं न+अतिभारिकम्॥9॥
गवाक्षितं सिराजालैः सदा गुडगुडायते।
नाभिमन्त्रं च विष्टभ्य वेगं कृत्वा प्रणश्यति॥10॥
मारुतः+ हृत्कटीनाभिपायुवङ्क्षणवेदनाः।
सशब्दः+ निश्चरेत्+वायुः+विड्बद्धा मूत्रमल्पकम्॥11॥
न+अतिमन्दः+अनलः+ लौल्यं न च स्यात्+विरसं मुखम्।
तत्र वातोदरे शोफः पाणिपान्मुष्ककुक्षिषु॥12॥
कुक्षिपार्श्वोदरकटीपृष्ठरुक् पर्वभेदनम्।
शुष्ककासः+अङ्गमर्दः+अधोगुरुता मलसङ्ग्रहः॥13॥
श्यावारुणत्वगादित्वम्+अकस्मात्+वृद्धिह्रासवत्।
सतोदभेदम्+उदरं तनुकृष्णसिराततम्॥14॥
आध्मातदृतिवत्+शब्दम्+आहतं प्रकरोति च।
वायुः+च+अत्र सरुक्शब्दः+ विचरेत्+सर्वतोगतिः॥15॥
पित्तोदरे ज्वरः+ मूर्च्छा दाहस्तृट् कटुकास्यता।
भ्रमः+अतिसारः पीतत्वं त्वगादौ+उदकं हरित्॥16॥
पीतताम्रसिरानद्धं सस्वेदं सोष्म दह्यते।
धूमायति मृदुस्पर्शं क्षिप्रपाकं प्रदूयते॥17॥
श्लेष्मोदरे+अङ्गसदनं स्वापः श्वयथुगौरवम्।
निद्रोत्क्लेशारुचिश्वासकासशुक्लत्वगादिता॥18॥
उदरं स्तिमितं श्लक्ष्णं शुक्लराजीततं महत्।
चिराभिवृद्धिः कठिनं शीतस्पर्शं गुरु स्थिरम्॥19॥
त्रिदोषकोपनैः+तैः+तैः स्त्रीदत्तैः+च रजोमलैः।
गरदूषीविषाद्यैः+च सरक्ताः सञ्चिता मलाः॥20॥
कोष्ठं प्राप्य विकुर्वाणाः शोषमूर्च्छाभ्रमान्वितम्।
कुर्युः+त्रिलिङ्गम्+उदरं शीघ्रपाकं सुदारुणम्॥21॥
बाधते तत्+च सुतरां शीतवाताभ्रदर्शने।
अत्याशितस्य सङ्क्षोभाद्यानयानादिचेष्टितैः॥22॥
अतिव्यवायकर्माध्ववमनव्याधिकर्शनैः।
वामपार्श्वाश्रितः प्लीहा च्युतः स्थानात्+विवर्द्धते॥23॥

शोणितं वा रसादिभ्यः+ विवृद्धं तं विवर्द्धयेत्।
सः+अष्ठीलेवातिकठिनः प्राक् ततः कूर्मपृष्ठवत्॥24॥
क्रमेण वर्द्धमानः+च कुक्षौ+उदरम्+आवहेत्।
श्वासकासपिपासास्यवैरस्याध्मानरुग्ज्वरैः॥25॥
पाण्डुत्वमूर्च्छाछर्दीभिः+दाहमोहैः+च संयुतम्।
अरुणाभं विवर्णं वा नीलहारिद्रराजिमत्॥26॥
उदावर्तरुजानाहैः+मोहतृड्दहनज्वरैः।
गौरवारुचिकाठिन्यैः+विद्यात्+तत्र मलान् क्रमात्॥27॥
प्लीहवत्+दक्षिणात्+पार्श्वात् कुर्यात्+यकृत्+अपि च्युतम्।
पक्ष्मवालैः सहान्नेन भुक्तैः+बद्धायने गुदे॥28॥
दुर्नामभिः+उदावर्तैः+अन्यैः+वा+अन्त्रोपलोपिभिः।
वर्चः पित्तकफान् रुद्ध्वा करोति कुपितः+अनिलः॥29॥
अपानः+ जठरं तेन स्युः+दाहज्वरतृट्क्षवाः।
कासश्वासोरुसदनं शिरोहृन्नाभिपायुरुक्॥30॥
मलसङ्गः+अरुचिः+च्छर्दिः+उदरं मूढमारुतम्।
स्थिरं नीलारुणसिराराजिनद्धम्+अराजि वा॥31॥
नाभेः+उपरि च प्रायः+ गोपुच्छाकृति जायते।
अस्थ्यादिशल्यैः सान्नैः+चेत्+भुक्तैः+अत्यशनेन वा॥32॥
भिद्यते पच्यते वा+अन्त्रं तत्+छिद्रैः+च स्रवन्+बहिः।
आमः+ एव गुदात्+एति ततः+अल्पाल्पं सविड्रसः॥33॥
तुल्यः कुणपगन्धेन पिच्छिलः पीतलोहितः।
शेषः+च+अपूर्यजठरं जठरं घोरम्+आवहेत्॥34॥
वर्द्धयेत्+तत्+अधः+ नाभेः+आशु च+एति जलात्+मताम्।
उद्रिक्तदोषरूपं च व्याप्तं च श्वासतृड्भ्रमैः॥35॥
छिद्रोदरम्+इदं प्राहुः परिस्रावि+इति च+अपरे।
प्रवृत्तस्नेहपानादेः सहसा+आमाम्बुपायिनः॥36॥
अत्यम्बुपानात्+मन्दाग्नेः क्षीणस्य+अतिकृशस्य वा।
रुद्ध्वा+अम्बुमार्गान्+अनिलः कफः+च जलमूर्च्छितः॥37॥
वर्धयेतां तत्+एव+अम्बु तत्+स्थानात्+उदराश्रितौ।
ततः स्यात्+उदरं तृष्णागुदस्रुतिरुजान्वितम्॥38॥
कासश्वासारुचियुतं नानावर्णसिराततम्।
तोयपूर्णदृतिस्पर्शशब्दप्रक्षोभवेपथु॥39॥

दकोदरं महत्+स्निग्धं स्थिरम्+आवृत्तनाभि तत्।
उपेक्षया च सर्वेषु दोषाः स्वस्थानतः+च्युताः॥40॥
पाकात्+द्रवा द्रवीकुर्युः सन्धिस्रोतोमुखानि+अपि।
स्वेदः+च बाह्यस्रोतःसु विहतः+तिर्यक्+आस्थितः॥41॥
तत्+एव+उदकम्+आप्याय्य पिच्छां कुर्यात्+तदा भवेत्।
गुरूदकं स्थिरं वृत्तम्+आहतं च न शब्दवत्॥42॥
मृदु व्यपेतराजीकं नाभ्यां स्पृष्टं च सर्पति।
तदनूदकजन्म+अस्मिन्+कुक्षिवृद्धिः+ततः+अधिकम्॥43॥
सिरान्तर्धानम्+उदकजठरोक्तं च लक्षणम्।
वातपित्तकफप्लीहसन्निपातोदकोदरम्॥44॥
कृच्छ्रं यथा+उत्तरम् पक्षात्+परं प्रायः+अपरे हतः।
सर्वं च जातसलिलं रिष्टोक्तोपद्रवान्वितम्॥45॥
जन्मनैव+उदरं सर्वं प्रायः कृच्छ्रतमं मतम्।
बलिनः+तदजाताम्बु यत्नसाध्यं नवोत्थितम्॥46॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने उदरनिदानं नाम द्वादशः+अध्यायः॥12॥
त्रयोदशः+अध्यायः।
अथ+अतः पाण्डुरोगशोफविसर्पनिदानं व्याख्यास्यामः
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
पित्तप्रधानाः कुपिता यथा+उक्तैः कोपनैः+मलाः।
तत्र+अनिलेन बलिना क्षिप्तं पित्तं हृदि स्थितम्॥1॥
धमनीः+दश सम्प्राप्य व्याप्नुवत्+सकलां तनुम्।
श्लेष्मत्वग्रक्तमांसानि प्रदूष्य+अन्तरम्+आश्रितम्॥2॥
त्वङ्मांसयोः+तत्+कुरुते त्वचि वर्णान् पृथक्+विधान्।
पाण्डुहारिद्रहरितान् पाण्डुत्वं तेषु च+अधिकम्॥3॥
यतः+अतः पाण्डुः+इत्युक्तः सः+ रोगः तेन गौरवम्।
धातूनां स्यात्+च शैथिल्यम्+ओजसः+च गुणक्षयः॥4॥
ततः+अल्परक्तमेदस्कः+ निःसारः स्यात्+श्लथेन्द्रियः।
मृद्यमानैः+इव+अङ्गैः+ना द्रवता हृदयेन च॥5॥
शूनाक्षिकूटः सदनः कोपनः ष्ठीवनः+अल्पवाक्।
अन्नद्विट् शिशिरद्वेषी शीर्णरोमा हतानलः॥6॥
सन्नसक्थः+ ज्वरी श्वासी कर्णक्ष्वेडी भ्रमी श्रमी।

स पञ्चधा पृथक्+दोषैः समस्तैः+मृत्तिकादनात्॥7॥
प्राग्रूपमस्य हृदयस्पन्दनं रूक्षता त्वचि।
अरुचिः पीतमूत्रत्वं स्वेदाभावः+अल्पवह्निता॥8॥
सादः श्रमः+ अनिलात्+तत्र गात्ररुक्तोदकम्पनम्।
कृष्णरूक्षारुणसिरानखविण्मूत्रनेत्रता॥9॥
शोफानाहास्यवैरस्यविट्शोषाः पार्श्वमूर्धरुक्।
पित्तात्+हरितपीताभसिरादित्वं ज्वरः+तमः॥10॥
तृट्स्वेदमूर्च्छाशीतेच्छा दौर्गन्ध्यं कटुवक्त्रता।
वर्चोभेदः+अम्लकः+ दाहः कफात्+शुक्लसिरादिता॥11॥
तन्द्रा लवणवक्त्रत्वं रोमहर्षः स्वरक्षयः।
कासः+च्छर्दिः+च निचयात्+मिश्रलिङ्गः+अतिदुःसहः॥12॥
मृत्कषाया+अनिलं पित्तम्+ऊषरा मधुरा कफम्।
दूषयित्वा रसादीन्+च रौक्ष्यात्+भुक्तं विरूक्ष्य च॥13॥
स्रोतांस्यपक्वैव+आपूर्य कुर्यात्+रुद्ध्वा च पूर्ववत्।
पाण्डुरोगं ततः शूननाभिपादास्यमेहनः॥14॥
पुरीषं कृमिमत्+मुञ्चेत्+भिन्नं सासृक्कफं नरः।
यः पाण्डुरोगी सेवेत पित्तलं तस्य कामलाम्॥15॥
कोष्ठशाखाश्रयां पित्तंग दग्ध्वा+असृङ्मांसम्+आवहेत।
हारिद्रनेत्रमूत्रत्वङ्नखवक्त्रशकृत्+तया॥16॥
दाहाविपाकतृष्णावान् भेकाभः+ दुर्बलेन्द्रियः।
भवेत्+पित्तोल्बणस्य+असौ पाण्डुरोगात्+ऋते+अपि च॥17॥
ऊपेक्षया च शोफाढ्या सा कृच्छ्रा कुम्भकामला।
हरितश्यावपीतत्वं पण्डुरोगे यदा भवेत्॥18॥
वातपित्तात्+भ्रमः+तृष्णा स्त्रीषु+अहर्षः+ मृदुः+ज्वरः।
तन्द्राबलानलभ्रंशः+ लोढरं तं हलीमकम्॥19॥
अलसं च+इति शंसन्ति तेषां पूर्वम्+उपद्रवाः।
शोफप्रधानाः कथिताः सः+ एव+अतः+ निगद्यते॥20॥
पित्तरक्तकफान्+वायुः+दुष्टः+ दुष्टान् बहिः सिराः।
नीत्वा रुद्धगतिः+तैः+हि कुर्यात्+त्वङ्मांससंश्रयम्॥21॥
उत्सेधं संहतं शोफं तम्+आहुः+निचयात्+अतः।
सर्वं हेतुविशेषैः+तु रूपभेदात्+नवात्मकम्॥22॥
दोषैः पृथक्+द्वयैः सर्वैः+अभिघातात्+विषात्+अपि।

द्विधा वा निजम्+आगन्तुं सर्वाङ्गैकाङ्गजं च तम्॥23॥
पृथून्नतग्रथितताविशेषैः+च त्रिधा विदुः।
सामान्यहेतुः शोफानां दोषजानां विशेषतः॥24॥
व्याधिकर्मोपवासादिक्षीणस्य भजतः+ द्रुतम्।
अतिमात्रमथान्यस्य गुर्वम्लस्निग्धशीतलम्॥25॥
लवणक्षारतीक्ष्णोष्णशाकाम्बुः+ स्वप्नजागरम्।
मृद्ग्राम्यमांसवल्लूरमजीर्णश्रममैथुनम्॥26॥
पदातेः+मार्गगमनं यानेन क्षोभिणा+अपि वा।
श्वासकासातिसारार्शोजठरप्रदरज्वराः॥27॥
विषूच्यलसकच्छर्दिगर्भवीसर्पपाण्डवः।
अन्ये च मिथ्योपक्रान्ताः+तैः+दोषाः+ वक्षसि स्थिताः॥28॥
ऊर्ध्वं शोफमधः+ बस्तौ मध्ये कुर्वन्ति मध्यगाः।
सर्वाङ्गगाः सर्वगतं प्रत्यङ्गेषु तदाश्रयाः॥29॥
तत्पूर्वरूपं दवथुः सिरायामः+अङ्गगौरवम्।
वातात्+शोफः+चलः+ रूक्षः खररोमा+अरुणासितः॥30॥
सङ्कोचस्पन्दहर्षार्तितोदभेदप्रसुप्तिमान्।
क्षिप्रोत्थानशमः शीघ्रम्+उन्नमेत्+पीडितः+तनुः॥31॥
स्निग्धोष्णमर्दनैः शाम्येत्+रात्रौ+अल्पः+ दिवा महान्।
त्वक् च सर्षपलिप्तः+इव तस्मिन्+चिमिचिमायते॥32॥
पीतरक्तासिताभासः पित्तात्+आताम्ररोमकृत्।
शीघ्रानुसारप्रशमः+ मध्ये प्राक्+जायते तनुः॥33॥
सतृड्दाहज्वरस्वेददवक्लेदमदभ्रमः।
शीताभिलाषी विड्भेदी गनधी स्पर्शासहः+ मृदुः॥34॥
कण्डूमान् पाण्डुरोमत्वक्कठिनः शीतलः+ गुरुः।
स्निग्धः श्लक्ष्णः स्थिरः स्त्यानः+ निद्रात्+च्छर्द्यग्निसादकृत्॥35॥
आक्रान्तः+ न+उन्नमेत्+कृच्छ्रशमजन्मा निशाबलः।
स्रवेत्+न+असृक् चिरात्+पिच्छां कुशशस्त्रादिविक्षतः॥36॥
स्पर्शोष्णकाङ्क्षी च कफात् यथास्वं द्वन्द्वजाः+त्रयः।
सङ्करात्+हेतुलिङ्गानां निचयात्+निचयात्मकः॥37॥
अभिघातेन शस्त्रादिच्छेदभेदक्षतादिभिः।
हिमानिलोदध्यनिलैः+भल्लातकपिकच्छुजैः॥38॥
रसैः शूकैः+च संस्पर्शात्+श्वयथुः स्यात्+विसर्पवान्।

भृशोष्मा लोहिताभासः प्रायशः पित्तलक्षणः॥39॥

विषजः सविषप्राणिपरिसर्पणमूत्रणात्।

दंष्ट्रादन्तनखापातादविषप्राणिनाम्+अपि॥40॥

विण्मूत्रशुक्रोपहतमलवत्+वस्त्रसङ्करात्।

विषवृक्षानिलस्पर्शाद्गरयोगावचूर्णनात्॥41॥

मृदुः+चलः+अवलम्बी च शीघ्रः+ दाहरुजाकरः।

नवः+अनुपद्रवः शोफः साध्यः+असाध्यः पुरा+ईरितः॥42॥

स्यात्+विसर्पः+अभिघातान्तैः+दोषैः+दूष्यैः+च शोफवत्।

त्र्यधिष्ठानं च तं प्राहुः+बाह्यान्तरुभयाश्रयात्॥43॥

यथा+उत्तरं च दुःसाध्याः तत्र दोषाः+ यथायथम्।

प्रकोपणैः प्रकुपिता विशेषेण विदाहिभिः॥44॥

देहे शीघ्रं विसर्पन्ति ते+अन्तरन्तः स्थिता बहिः।

बहिःस्था द्वितये द्विस्थाः विद्यात्+तत्र+अन्तराश्रयम्॥45॥

मर्मोपतापात्+सम्मोहादयनानां विघट्टनात्।

तृष्णातियोगात्+वेगानां विषमं च प्रवर्तनात्॥46॥

आशु च+अग्निबलभ्रंशात्+अतः+ बाह्यं विपर्ययात्।

तत्र वातात्+परीसर्पः+ वातज्वरसमव्यथः॥47॥

शोफस्फुरणनिस्तोदभेदायामार्तिहर्षवान्।

पित्तात्+द्रुतगतिः पित्तज्वरलिङ्गः+अतिलोहितः॥48॥

कफात्+कण्डूयुतः स्निग्धः कफज्वरसमानरुक्।

स्वदोषलिङ्गैः+चीयन्ते स्रवे स्फोटैः+उपेक्षिताः॥49॥

ते पक्वभिन्नाः स्वं स्वं च बिभ्रति व्रणलक्षणम्।

वातपित्तात्+ज्वरच्छर्दिमूर्च्छातीसारतृड्भ्रमैः॥50॥

अस्थिभेदाग्निसदनतमकारोचकैः+युतः।

करोति सर्वमङ्गं च दीप्ताङ्गारौ+अकीर्णवत्॥51॥

यं यं देशं विसर्पः+च विसर्पति भवेत्+सः+ सः।

शान्ताङ्गारासितः+ नीलः+ रक्तः+ वा+आशु च चीयते॥52॥

अग्निदग्धः+ इव स्फोटैः शीघ्रगत्वाद् द्रुतं च सः।

मर्मानुसारी वीसर्पः स्यात्+वातः+अतिबलः+ततः॥53॥

व्यथेत+अङ्गं हरेत्+संज्ञां निद्रां च श्वासम्+ईरयेत्।

हिध्मां च सः+ गतः+अवस्थाम्+ईदृशीं लभते न ना॥54॥

क्वचित्+छर्मारतिग्रस्तः+ भूमिशय्यासनादिषु।

चेष्टमानः+ततः क्लिष्टः+ मनोदेहश्रमोद्भवाम्॥55॥
दुष्प्रबोधः+अश्नुते निद्रां सः+अग्निवीसर्पः+ उच्यते।
कफेन रुद्धः पवनः+ भित्त्वा तं बहुधा कफम्॥56॥
रक्तं वा वृद्धरक्तस्य त्वक्सिरास्नावमांसगम्।
दूषयित्वा च दीर्घाणुवृत्तस्थूलखरात्मनाम्॥57॥
ग्रन्थीनां कुरुते मालां रक्तानां तीव्ररुग्ज्वराम्।
श्वासकासातिसारास्यशोषहिध्मावमिभ्रमैः॥58॥
मोहवैवर्ण्यमूर्च्छाङ्गभङ्गाग्निसदनैः+युताम्।
इति+अयं ग्रन्थिवीसर्पः कफमारुतकोपजः॥59॥
कफपित्तात्+ज्वरः स्तम्भः+ निद्रातन्द्राशिरोरुजः।
अङ्गावसादविक्षेपप्रलापारोचकभ्रमाः॥60॥
मूर्च्छाग्निहानिः+भेदः+अस्थ्नां पिपासेन्द्रियगौरवम्।
आमोपवेशनं लेपः स्रोतसां सः+ च सर्पति॥61॥
प्रायेण+आमाशये गृह्णन्+एकदेशं न च+अतिरुक्।
पिटकैः+अवकीर्णः+अतिपीतलोहितपाण्डुरैः॥62॥
मेचकाभः+असितः स्निग्धः+ मलिनः शोफवान् गुरुः।
गम्भीरपाकः प्राज्योष्मा स्पृष्टः क्लिन्नः+अवदीर्यते॥63॥
पङ्कवत्+शीर्णमांसः+च स्पष्टस्नायुसिरागणः।
शवगन्धिः+च वीसर्पं कर्दमाख्यम्+उशन्ति तम्॥64॥
सर्वजः+ लक्षणैः सर्वैः सर्वधात्वतिसर्पणः।
बाह्यहेतोः क्षतात्+क्रुद्धः सरक्तं पित्तम्+इरयन्॥65॥
विसर्पं मारुतः कुर्यात् कुल्त्थसदृशैः+चितम्।
स्फोटैः शोफज्वररुजादाहाढ्यं श्यावलोहितम्॥66॥
पृथक्+दोषैः+त्रयः साध्या द्वन्द्वजाः+च+अनुपद्रवाः।
असाध्यौ क्षतसर्वोत्थौ सर्वे च+आक्रान्तमर्मकाः॥67॥
शीर्णस्नायुसिरामांसाः प्रक्लिन्नाः शवगन्धयः॥67 1/2॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने
पाण्डुरोगशोफविसर्पनिदानं नाम त्रयोदशः+अध्यायः॥13॥
चतुर्दशः+अध्यायः।
अथ+अतः कुष्ठश्वित्रकृमिनिदानं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
मिथ्याहारविहारेण विशेषेण विरोधिना।

साधुनिन्दावधान्यस्वहरणाद्यैः+च सेवितैः॥1॥
पाप्मभिः कर्मभिः सद्यः प्राक्तनैः+वेरिता मलाः।
सिराः प्रपद्य तिर्यग्गास्त्वग्लसीकासृगामिषम्॥2॥
दूषयन्ति श्लथीकृत्य निर्चरन्तः+ततः+ बहिः।
त्वचः कुर्वन्ति वैवर्ण्यं दुष्टाः कुष्ठम्+उशन्ति तत्॥3॥
कालेन+उपेक्षितं यस्मात्+सर्वं कुष्णाति तद्वपुः।
प्रपद्य धातुन्व्याप्यान्तः सर्वान् संक्लेद्य च+आवहेत्॥4॥
सस्वेदक्लेदसङ्कोथान् कृमिन् सूक्ष्मान् सुदारुणान्।
लोमत्वक्स्नायुधमनीतरुणास्थीनि यैः क्रमात्॥5॥
भक्षयेत्+श्वित्रम्+अस्मात्+च कुष्ठबाह्यम्+उदाहृतम्।
कुष्ठानि सप्तधा दोषैः पृथक्+मिश्रैः समागतैः॥6॥
सर्वेषु+अपि त्रिदोषेषु व्यपदेशः+अधिकत्वतः।
वातेन कुष्ठं कापालं, पित्तात्+औदुम्बरं, कफात्॥7॥
मण्डलाख्यं विचर्ची च, ऋक्षाख्यं वातपित्तजम्।
चर्मैककुष्ठकिटिभसिध्मालसविपादिकाः॥8॥
वातश्लेष्मोद्भवाः, श्लेष्मपित्तात्+दद्रुशतारुषी।
पुण्डरीकं सविस्फोटं पामा चर्मदलं तथा॥9॥
सर्वैः स्यात्+काकणं पूर्वं त्रिकं दद्रु सकाकणम्।
पुण्डरीकर्क्षजिह्वे च महाकुष्ठानि सप्त तु॥10॥
अतिश्लक्ष्णखरस्पर्शखेदास्वेदविवर्णताः।
दाहः कण्डूः+त्वचि स्वापः+तोदः कोठोन्नतिः श्रमः॥11॥
व्रणानाम्+अधिकं शूलं शीघ्रोत्पत्तिः+चिरस्थितिः।
रूढानाम्+अपि रूक्षत्वं निमित्ते+अल्पे+अपि कोपनम्॥12॥
रोमहर्षः+असृजः कार्ष्ण्यं कुष्ठलक्षणम्+अग्रजम्।
कृष्णारुणकपालाभं रूक्षं सुप्तं खरं तनु॥13॥
विस्तृतासमपर्यन्तं हृषितैः+लोमभिः+चितम्।
तोदाढ्यम्+अल्पकण्डूकं कापालं शीघ्रसर्पिः+ च॥14॥
पक्वोदुम्बरताम्रत्वग्रोम गौरसिः+आचितम्।
बहलं बहलक्लेदरक्तं दाहरुजाधिकम्॥15॥
आशूत्थानावदरणकृमि विद्यात्+उदुम्बरम्।
स्थिरं स्त्यानं गुरु स्निग्धं श्वेतरक्तम्+अनाशुगम्॥16॥
अन्योन्यसक्तम्+उत्सन्नं बहुकण्डूस्रुतिक्रिमि।

श्लक्ष्णपीताभपर्यन्तं मण्डलं परिमण्डलम्॥17॥
सकण्डूपिटिका श्यावा लसीकाढ्या विचर्चिका।
परुषं तनु रक्तान्तम्+अन्तः श्यावं समुन्नतम्॥18॥
सतोददाहरुक्क्लेदं कर्कशैः पिटिकैः+चितम्।
ऋक्षजिह्वाकृति प्रोक्तम्+ऋक्षजिह्वं बहुक्रिमि॥19॥
हस्तिचर्मखरस्पर्शं चर्मः+ एकाख्यं महाश्रयम्।
अस्वेदं मत्स्यशकलसन्निभम् किटिभं पुनः॥20॥
रूक्षं किणखरस्पर्शं कण्डूमत्+परुषासितम्।
सिध्मं रूक्षं बहिः स्निग्धम्+अन्तर्घृष्टं रजः किरेत्॥21॥
श्लक्ष्मस्पर्शं तनु श्वेतताम्रं दौग्धिकपुष्पवत्।
प्रायेण च+उर्ध्वकाये स्यात् गण्डैः कण्डूयुतैः+चितम्॥22॥
रक्तैः+अलसकम् पाणिपाददार्यः+ विपादिकाः।
तीव्रार्त्यः+ मन्दकण्ड्वः+च सरागपिटिकाचिताः॥23॥
दीर्घप्रतानां दूर्वावत्+अतसीकुसुमच्छविः।
उत्सन्नमण्डला दद्रूः कण्डूमति+अनुषङ्गिणी॥24॥
स्थूलमूलं सदाहार्ति रक्तश्यावं बहुव्रणम्।
शतारुः क्लेदजन्त्वाढ्यं प्रायशः पर्वजन्म च॥25॥
रक्तान्तम्+अन्तरा पाण्डु कण्डूदाहः+उडजान्वितम्।
स+उत्सेधम्+आचितं रक्तैः पद्मपत्रम्+इव+अंशुभिः॥26॥
घनभूरिलसीकासृक्प्रायम्+आशु विभेदि च।
पुण्डरीकम् तनुत्वग्भिः+चितं स्फोटैः सितारुणैः॥27॥
विस्फोटम् पिटिकाः पामा कण्डूक्लेदरुजाधिकाः।
सूक्ष्माः श्यावारुणा बह्व्यः प्रायः स्फिक्पाणिकूर्परे॥28॥
सस्फोटमस्पर्शसहं कण्डूषातोददाहवत्।
रक्तं दलत्+चर्मदलम् काकणं तीव्रदाहरुक्॥29॥
पूर्वं रक्तं च कृष्णं च काकणन्तीफलोपमम्।
कुष्ठलिङ्गैः+युतं सर्वैः+न+एकवर्णं ततः+ भवेत्॥30॥
दोषभेदीयविहितैः+आदिशेत्+लिङ्गकर्मभिः।
कुष्ठेषु दोषोल्बणताम् सर्वदोषोल्बणं त्यजेत्॥31॥
रिष्टोक्तं यत्+च यत्+च+अस्थिमज्जशुक्रसमाश्रयम्।
याप्यं मेदोगतम् कृच्छ्रं पित्तद्वन्द्वास्रमांसगम्॥32॥
अकृच्छ्रं कफवाताढ्यं त्वक्स्थम्+एकम्+अलं च यत्।

तत्र त्वचि स्थिते कुष्ठे तोदवैवर्ण्यरूक्षताः॥33॥
स्वेदस्वापश्वयथवः शोणिते, पिशिते पुनः।
पाणिपादाश्रिताः स्फोटाः क्लेदः सन्धिषु च+अधिकम्॥34॥
कौण्यं गतिक्षयः+अङ्गानां दलनं स्यात्+च मेदसि।
नासाभङ्गः+अस्थिमज्जस्थे नेत्ररागः स्वरक्षयः॥35॥
क्षते च कृमयः, शुक्रे स्वदारापत्यबाधनम्।
यथापूर्वं च सर्वाणि स्युः+लिङ्गान्यसृगादिषु॥36॥
कुष्ठैकसम्भवं श्वित्रं किलासं दारुणं च तत्।
निर्दिष्टम्+अपरिस्रावि त्रिधातूद्भवसंश्रयम्॥37॥
वातात्+रूक्षारुणं, पित्तात्+ताम्रं कमलपत्रवत्।
सदाहं रोमविध्वंसि, कफात्+श्वेतं घनं गुरु॥38॥
सकण्डु च, क्रमात्+रक्तमांसभेदःसु च+आदिशेत्।
वर्णेन+एवेत्+ऋगुभयं कृच्छ्रं तत्+च+उत्तरोत्तरम्॥39॥
अशुक्लरोमाबहलम्+असंसृष्टं मिथः+ नवम्।
अनग्निदग्धजं साध्यं श्वित्रं, वर्ज्यमतः+अन्यथा॥40॥
गुह्यपाणितलौष्ठेषु जातम्+अपि+अचिरन्तनम्।
स्पर्शैकाहारशय्यादिसेवनात् प्रायशः+ गदाः॥41॥
सर्वे सञ्चारिणः+, नेत्रत्वग्विकारा विशेषतः।
कृमयः+तु द्विधा प्रोक्ता बाह्याभ्यन्तरभेदतः॥42॥
बहिः+मलकफासृग्विड्जन्मभेदात्+चतुर्विधाः।
नामतः+ विंशतिविधाः बाह्याः+तत्र+अमृजोद्भवाः॥43॥
तिलप्रमाणसंस्थानवर्णाः केशाम्बराश्रयाः।
बहुपादाः+च सूक्ष्माः+च यूका लिक्षाः+च नामतः॥44॥
द्विधा ते कोठपिटिकाकण्डूगण्डान् प्रकुर्वते।
कुष्ठैकहेतवः+अन्तर्जाः श्लेष्मजाः+तेषु च+अधिकम्॥45॥
मधुरान्नगुडक्षीरदधिसक्तुनवौदनैः।
शकृज्जा बहुविड्धान्यपर्णशाकोलकादिभिः॥46॥
कफात्+आमाशये जाता वृद्धाः सर्पन्ति सर्वतः।
पृथुब्रध्ननिभाः केचित् केचित्+गण्डूपदोपमाः॥47॥
रूढधान्याङ्कुराकाराः+तनुदीर्घाः+तथा+अणवः।
श्वेताः+ताम्रावभासाः+च नामतः सप्तधा तु ते॥48॥
अन्त्रादा उदरावेष्टा हृदयादा महाकुहाः।

कुरवः+ दर्भकुसुमाः सुगन्धाः+ते च कुर्वते॥49॥
हृल्लासमास्यस्रवणमविपाकम्+अरोचकम्।
मूर्च्छाच्छर्दिज्वरानाहकार्श्यक्षवथुपीनसान्॥50॥
रक्तवाहिसिरोत्थाना रक्तजा जन्तवः+अणवः।
अपादा वृत्तताम्राः+च सौक्ष्म्यात्+केचित्+अदर्शनाः॥51॥
केशादा लोमविध्वंसा लोमद्वीपा उदुम्बराः।
षट् ते कुष्ठैककर्माणः सहसौरसमातरः॥52॥
पक्वाशये पुरीषोत्था जायन्ते+अधोविसर्पिणः।
वृद्धाः सन्तः+ भवेयुः+च ते यदा+आमाशयोन्मुखाः॥53॥
तदा+अस्योद्गारनिःश्वासा विड्गन्धानुविधायिनः।
पृथुवृत्ततनुस्थूलाः श्यावपीतसितासिताः॥54॥
ते पञ्च नाम्ना कृमयः ककेरुकम्+अकेरुकाः।
सौसुरादाः सुलूनाख्या लेलिहा जनयन्ति च॥55॥
विड्भेदशूलविष्टम्भकार्श्यपारुष्यपाण्डुताः।
रोमहर्षाग्निसदनगुदकण्डूः+विनिर्गमात्॥56॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने कुष्ठश्वित्रकृमिनिदानं नाम चतुर्दशः+अध्यायः॥14॥

पञ्चदशः+अध्यायः।

अथ+अतः+ वातव्याधिनिदानां व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
सर्वार्थानर्थकरणे विश्वस्य+अस्य+एककारणम्।
अदुष्टदुष्टः पवनः, शरीरस्य विशेषतः॥1॥
स विश्वकर्मा विश्वात्मा विश्वरूपः प्रजापतिः।
स्रष्टा धाता विभुः+विष्णुः संहर्ता मृत्युः+अन्तकः॥2॥
तत्+अदुष्टौ प्रयत्नेन यतितव्यमतः सदा।
तस्य+उक्तं दोषविज्ञाने कर्म प्राकृतवैकृतम्॥3॥
समासात्+व्यासतः+ दोषभेदीये नाम धाम च।
प्रत्येकं पञ्चधा चारः+ व्यापारः+च इह वैकृतम्॥4॥
तस्य+उच्यते विभागेन सनिदानं सलक्षमम्।
असङ्ख्यम्+अपि सङ्ख्याय यदशीत्या पुरा+ईरितम्।
धातुक्षयकरैः+वायुः कुप्यति+अतिनिषेवितैः॥5॥
चरन् स्रोतःसु रिक्तेषु भृशं तानि+एव पूरयन्।

तेभ्यः+अन्यदोषपूर्णेभ्यः प्राप्य वा+आवरणं बली॥6॥

तत्र पक्वाशये क्रुद्धः शूलानाहान्त्रकूजनम्।

मलरोधाश्मवर्ध्मार्शस्त्रिकपृष्ठकटीग्रहम्॥7॥

करोति+अधरकाये च तान्+तान् कृच्छ्रान्+उपद्रवान्।

आमाशये तृड्वमथुश्वासकासविसूचिकाः॥8॥

कण्ठोपरोधमुद्गारान् व्याधीन्+ऊर्ध्वं च नाभितः।

श्रोत्रादिषु+इन्द्रियवधं त्वचि स्फुटन्+अरूक्षते॥9॥

रक्ते तीव्रा रुजः स्वापं तापं रागं विवर्णताम्।

अरूष्यन्+अस्य विष्टम्भम्+अरुचिं कृशतां भ्रमम्॥10॥

मांसमेदोगतः+ ग्रन्थीन्+तोदाढ्यान् कर्कशान् श्रमम्।

गुर्वङ्गं च+अतिरुक्स्तब्धं मुष्टिदण्डहतोपमम्॥11॥

अस्थिस्थः सक्थिसन्ध्यस्थिशूलं तीव्रं बलक्षयम्।

मज्जस्थः+अस्थिषु सौषिर्यम्+अस्वप्नं सन्ततां रुजम्॥12॥

शुक्रस्य शीघ्रम्+उत्सर्गं सङ्गं विकृतिम्+एव वा।

तद्वत्+गर्भस्य शुक्रस्थः सिरास्वाध्मानरिक्तते॥13॥

तत्स्थः स्नावस्थितः कुर्यात्+गृध्रस्य+अयामकुब्जताः।

वातपूर्णदृतिस्पर्शं शोफं सन्धिगतः+अनिलः॥14॥

प्रसारणाकुञ्चनयोः प्रवृत्तिं च सवेदनाम्।

सर्वाङ्गसंश्रयस्तोदभेदस्फुरणभञ्जनम्॥15॥

स्तम्भनाक्षेपणस्वापसन्ध्याकुञ्चनकम्पनम्।

यदा तु धमनीः सर्वाः क्रुद्धः+अभ्येति मुहुः+मुहुः॥16॥

तदा+अङ्गम्+आक्षिपति+एषः+ व्याधिः+आक्षेपकः स्मृतः।

अधः प्रतिहतः+ वायुः+व्रजन्+ऊर्ध्वं हृदाश्रिताः॥17॥

नाडीः प्रविश्य हृदयं शिरः शङ्खौ च पीडयन्।

आक्षिपेत्+परितः+ गात्रं धनुर्वत्+च+अस्य नामयेत्॥18॥

कृच्छ्रात्+उच्छ्वसिति स्तब्धस्रस्तमीलितदृक्ततः।

कपोतः+ इव कृजेत्+च निःसंज्ञः सः+अपतन्त्रकः॥19॥

सः+ एव च+अपतानाख्यः+ मुक्ते तु मरुता हृदि।

अश्नुवीत मुहुः स्वास्थ्यं मुहुः+अस्वास्थ्यम्+आवृते॥20॥

गर्भपातसमुत्पन्नः शोणितातिस्रवोत्थितः।

अभिघातसमुत्थः+च दुश्चिकित्स्यतमः+ हि सः॥21॥

मन्ये संस्तभ्य वातः+अन्तः+आयच्छन् धमनीः+यदा।

व्याप्नोति सकलं देहं जत्रुः+आयम्यते तदा॥22॥
अन्तर्धनुः+इव+अङ्गं च वेगैः स्तम्भं च नेत्रयोः।
करोति जृम्भां दशनं दशनानां कफोद्वमम्॥23॥
पार्श्वयोः+वेदनां वाक्यहनुपृष्ठशिरोग्रहम्।
अन्तरायाम इति+एषः+ बाह्यायामः+च तद्विधः॥24॥
देहस्य बहिरायामात् पृष्ठतः+ नीयते शिरः।
उरः+च+उत्क्षिप्यते तत्र कन्धरा च+अवमृद्यते॥25॥
दन्तेषु+आस्ये च वैवर्ण्यं प्रस्वेदः स्रस्तगात्रता।
बाह्यायामं धनुष्कम्भं ब्रुवते वेगिनं च तम्॥26॥
व्रणं मर्माश्रितं प्राप्य समीरणसमीरणात्।
व्यायच्छन्ति तनुं दोषाः सर्वामापादमस्तकम्॥27॥
तृष्यतः पाण्डुगात्रस्य व्रणायामः सः+ वर्जितः।
गते वेगे भवेत्+स्वास्थ्यं सर्वेषु+आक्षेपकेषु च॥28॥।
जिह्वातिलेखनात्+शुष्कभक्षणात्+अभिघाततः।
कुपितः+ हनुमूलस्थः स्रंसयित्वा+अनिलः+ हनू॥29॥
करोति विवृतास्यत्वम्+अथवा संवृतास्यताम्।
हनुस्रंसः सः+ तेन स्यात्+कृच्छ्रात्+चर्वणभाषणम्॥30॥
वाग्वाहिनीसिरासंस्थः+ जिह्वां स्तम्भयते+अनिलाः।
जिह्वास्तम्भः सः+ तेन+अन्नपानवाक्येषु+अनीशता॥31॥
शिरसा भारहरणात्+अतिहास्यप्रभाषणात्।
उत्त्रासवक्त्रक्षवथोः खरकार्मुककर्षणात्॥32॥
विषमात्+उपधानात्+च कठिनानां च चर्वणात्।
वायुः+विवृद्धः+तैः+तैः+च वातलैः+ऊर्ध्वम्+आस्थितः॥33॥
वक्रीकरोति वक्त्रार्धम्+उक्तं हसितमीक्षितम्।
ततः+अस्य कम्पते मूर्द्धा वाक्सङ्गः स्तब्धनेत्रता॥34॥
दन्तचालः स्वरभ्रंशः श्रुतिहानिः क्षवग्रहः।
गन्धाज्ञानं स्मृतेः+मोहः+त्रासः सुप्तस्य जायते॥35॥
निष्ठीवः पार्श्वतः+ यायात्+एकस्य+अक्ष्णः+ निमीलनम्।
जत्रोः+ऊर्ध्वं रुजा तीव्रा शरीरार्धे+अधरे+अपि वा॥36॥
तम्+आहुः+अर्दितं केचित्+एकायामम्+अथ+अपरे।
रक्तम्+आश्रित्य पवनः कुर्यात्+मूर्द्धधराः सिराः॥37॥
रूक्षाः सवेदनाः कृष्णाः सः+असाध्यः स्यात्+सिराग्रहः।

गृहीत्वा+अर्धं तनोः+वायुः सिराः स्नायूः+विशोष्य च॥38॥
पक्षम्+अन्यतरं हन्ति सन्धिबन्धान् विमोक्षयन्।
कृत्स्नः+अर्धकायः+तस्य स्यात्+अकर्मण्यः+ विचेतनः॥39॥
एकाङ्गरोगं तं केचित्+अन्ये पक्षवधं विदुः।
सर्वाङ्गरोगं तद्वत्+च सर्वकायाश्रिते+अनिले॥40॥
शुद्धवातहतः पक्षः कृच्छ्रसाध्यतमः+ मतः।
कृच्छ्रः+तु+अन्येन संसृष्टः+ विवर्ज्यः क्षयहेतुकः॥41॥
आमबद्धायनः कुर्यात्+संस्तभ्याङ्गं कफान्वितः।
असाध्यं हतसर्वेहं दण्डवत्+दण्डकं मरुत्॥42॥
आंसमूलस्थितः+ वायुः सिराः सङ्कोच्य तत्रगाः।
बाहुप्रस्पन्दितहरं जनयति+अवबाहुकम्॥43॥
तलं प्रत्यङ्गुलीनां या कण्डरा बाहुपृष्ठतः।
बाहुचेष्टापहरणी विश्वाची नाम सा स्मृता॥44॥
वायुः कट्यां स्थितः सक्थ्नः कण्डराम्+आक्षिपेत्+यदा।
तदा खञ्जः+ भवेत्+जन्तुः पङ्गुः सक्थ्न्योः+द्वयोः+अपि॥45॥
कम्पते गमनारम्भे खञ्जन्+इव च याति यः।
कलायखञ्जं तं विद्यात्+मुक्तसन्धिप्रबन्धनम्॥46॥
शीतोष्णद्रवसंशुष्कगुरुस्निग्धैः+निषेवितैः।
जीर्णाजीर्णे तथा+आयाससङ्क्षोभस्वप्नजागरैः॥47॥
सश्लेष्ममेदः पवनम्+आममत्यर्थसञ्चितम्।
अभिभूयेतरं दोषम्+ऊरू चेत्+प्रतिपद्यते॥48॥
सक्थ्यस्थीनि प्रपूर्यान्तः श्लेष्मणा स्तिमितेन तत्।
तदा स्कभ्नाति तेन+ऊरू स्तब्धौ शीतावचेतनौ॥49॥
परकीयौ+इव गुरू स्याताम्+अतिभृशव्यथौ।
ध्यानाङ्गमर्दस्तैमित्यतन्द्राच्छर्द्यरुचिज्वरैः॥50॥
संयुतौ पादसदनकृच्छ्रोद्धरणसुप्तिभिः।
तम्+ऊरुस्तम्भम्+इति+आहुः+आढ्यवातम्+अथ+अपरे॥51॥
वातशोणितजः शोफः+ जानुमध्ये महारुजः।
ज्ञेयः क्रोष्टुकशीर्षः+च स्थूलः क्रोष्टुकशीर्षवत्॥52॥
रुक् पादे विषम्+अन्यः+ते श्रमात्+वा जायते यदा।
वातेन गुल्फम्+आश्रित्य तम्+आहुः+वातकण्टकम्॥53॥
पार्ष्णिं प्रत्यङ्गुलीनां या कण्डरा मारुतार्दिता।

सक्थि+उत्क्षेपं निगृह्णाति गृध्रसीं तां प्रचक्षते॥54॥

विश्वाची गृध्रसी च+उक्ता खल्ली तीव्ररुजान्विते।

हृष्येते चरणौ यस्य भवेतां च प्रसुप्तवत्॥55॥

पादहर्षः सः+ विज्ञेयः कफमारुतकोपजः।

पादयोः कुरुते दाहं पित्तासृक्सहितः+अनिलः॥56॥

विशेषतः+चङ्क्रमिते पाददाहं तम्+आदिशेत् ॥56 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने वातव्याधिनिदानं नाम पञ्चदशः+अध्यायः॥15॥

षोडशः+अध्यायः।

अथ+अतः+ वातशोणितनिदानं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

विदाह्यन्नं विरुद्धं च तत्+तत्+च+असृक्+प्रदूषणम्।

भजतां विधिहीनं च स्वप्नजागरमैथुनम्॥1॥

प्रायेण सुकुमाराणाम्+अचङ्क्रमणशीलिनाम्।

अभिघातात्+अशुद्धेः+च नृणाम्+असृजि दूषिते॥2॥

वातलैः शीतलैः+वायुः+वृद्धः क्रुद्धः+ विमार्गगः।

तादृशैव+असृजा रुद्धः प्राक्+तत्+एव प्रदूषयेत्॥3॥

आढ्यरोगं खुडं वातबलासं वातशोणितम्।

तत्+आहुः+नामभिः तत्+च पूर्वं पादौ प्रधावति॥4॥

विशेषाद्यानयानाद्यैः प्रलम्बौ तस्य लक्षणम्।

भविष्यतः कुष्ठसमं तथा सादः श्लथाङ्गता॥5॥

जानुजङ्घोरुकट्यंसहस्तपादाङ्गसन्धिषु।

कण्डूस्फुरणनिस्तोदभेदगौरवसुप्तताः॥6॥

भूत्वा भूत्वा प्रणश्यन्ति मुहुः+आराविः+भवन्ति च।

पादयोः+मूलमास्थाय कदाचित्+धस्तयोः+अपि॥7॥

आखोः+इव विषं क्रुद्धं कृत्स्नं देहं विधावति।

त्वङ्मांसाश्रयम्+उत्तानं तत्+पूर्वं जायते ततः॥8॥

कालन्तरेण गम्भीरं सर्वान् धातून्+अभिद्रवत्।

कण्ड्वादिसंयुतोत्ताने त्वक्ताम्रा श्यावलोहिता॥9॥

सायामा भृशदाहोषा गम्भीरे+अधिकपूर्वरुक्।

श्वयथुः+ग्रथिताः पाकी वायुः सन्ध्यस्थिमज्जसु॥10॥

छिन्दन्+इव चरति+अन्तः+वक्रीकुर्वन्+च वेगवान्।

करोति खञ्जं पङ्गुं वा शरीरे सर्वतः+चरन्॥11॥

वाते+अधिके+अधिकं तत्र शूलस्फुरणतोदनम्।

शोफस्य रौक्ष्यकृष्णत्वश्यावतावृद्धिहानयः॥12॥

धमन्यङ्गुलिसन्धीनां सङ्कोचः+अङ्ग्रहः+अतिरुक्।

शीतद्वेषानुपशयौ स्तम्भवेपथुसुप्तयः॥13॥

रक्ते शोफः+अतिरुक्+तोदः+ताम्रः+चिमिचिमायते।

स्निग्धरूक्षैः शमं न+एति कण्डूक्लेदसमन्वितः॥14॥

पित्ते विदाहः सम्मोहः स्वेदः+ मूर्च्छा मदः सतृट्।

स्पर्शाक्षमत्वं रुग्रागः शोफः पाकः+ भृशोष्मता॥15॥

कफे स्तैमित्यगुरुतासुप्तिस्निग्धत्वशीतताः।

कण्डूर्मन्दा च रुक् द्वन्द्वसर्वलिङ्गं च सङ्करे॥16॥

एकदोषानुगं साध्यं नवं, याप्यं द्विदोषजम्।

त्रिदोषजं त्यदोत्स्रावि स्तब्धम्+अर्बुदकारि च॥17॥

रक्तमार्गं निहति+आशु शाखासन्धिषु मारुतः।

निविश्यान्योन्यम्+आवार्य वेदनाभिः+हरति+असून्॥18॥

वायौ पञ्चात्मके प्राणः+ रौक्ष्यव्यायामलङ्घनैः।

अत्याहाराभिघाताध्ववेगोदीरणधारणैः॥19॥

कुपितः+चक्षुरादीनाम्+उपघातं प्रवर्तयेत्।

पीनसार्दिततृट्कासश्वासादीन्+च+आमयान्+बहून्॥20॥

उदानः क्षवथूद्गारच्छर्दिनिद्राविधारणैः।

गुरुभारातिरुदितहास्यात्+यैः+विकृतः+ गदान्॥21॥

कण्ठरोधमनोभ्रंशच्छर्द्यरोचकपीनसान्।

कुर्यात्+च गलगण्डादीन्+तान्+तान् जत्रूर्ध्वसंश्रयान्॥22॥

व्यानः+अतिगमनध्यानक्रीडाविषमचेष्टितैः।

विरोधिरूक्षभीहर्षविषादाद्यैः+च दूषितः॥23॥

पुंस्त्वोत्साहबलंभ्रंशशोफचित्तोत्प्लवज्वरान्।

सर्वाङ्गरोगनिस्तोदरोमहर्षाङ्गसुप्तताः॥24॥

कुष्ठं विसर्पमन्यांः+च कुर्यात्+सर्वाङ्गगान् गदान्।

समानः+ विषमाजीर्णशीतसङ्कीर्णभोजनैः॥25॥

करोति+अकालशयनजागराद्यैः+च दूषितः।

शूलगुल्मग्रहण्यादीन् पक्वामाशयजान् गदान्॥26॥

अपानः+ रूक्षगुर्वन्नवेगाघातातिवाहनैः।

यानयानासनस्थानचङ्क्रमैः+च+अतिसेवितैः॥27॥
कुपितः कुरुते रोगान् कृच्छ्रान् पक्वाशयाश्रयान्।
मूत्रशुक्रप्रदोषार्शोगुदभ्रंशादिकान् बहून्॥28॥
सर्वं च मारुतं सामं तन्द्रातैमित्यगौरवैः।
स्निग्धत्वारोचकालस्यशैत्यशोफाग्निहानिभिः॥29॥
कटुरूक्षाभिलाषेण तद्विधोपशयेन च।
युक्तं विद्यात्+निरामं तु तनद्रादीनां विपर्ययात्॥30॥
वायोः+आवरणं च+अतः+ बहुभेदं प्रवक्ष्यते।
लिङ्गं पित्तावृते दाहः+तृष्णा शूलं भ्रमः+तमः॥31॥
कटुकोष्णाम्ललवणैः+विदाहः शीतकामता।
शैत्यगौरवशूलानि कट्वाद्युपशयः+अधिकम्॥32॥
लङ्घनायासरूक्षोष्णकामता च कफावृते।
रक्तावृते सदाहा+अर्तिः+त्वङ्मांसान्तरजा भृशम्॥33॥
भवेत्+च रागी श्वयथुः+जायन्ते मण्डलानि च।
मांसेन कठिनाः शोफः+ वर्णः पिटिकाः+तथा॥34॥
हर्षः पिपीलिकानां च सञ्चारः+ इव जायते।
चलः स्निग्धः+ मृदुः शीतः शोफः+ गात्रेषु+अरोचकः॥35॥
आढ्यवातः+ इति ज्ञेयः सः+ कृच्छ्रः+ मेदसा+आवृते।
स्पर्शम्+अस्थ्यावृते+अत्युष्णं पीडनं च+अभिनन्दति॥36॥
सूच्या+एव तुद्यते+अत्यर्थम्+अङ्गं सीदति शूल्यते।
मज्जावृते विनमनं जृम्भणं परिवेष्टनम्॥37॥
शूलं च पीड्यमानेन पाणिभ्यां लभते सुखम्।
शुक्रावृते+अतिवेगः+ वा न वा निष्फलता+अपि वा॥38॥
भुक्ते कुक्षौ रुजा जीर्णे शाम्यति+अन्नावृते+अनिले।
मूत्राप्रवृत्तिः+आध्मानं बस्तेः+मूत्रावृते भवेत्॥39॥
विडावृते विबन्धः+अधः स्वस्थाने परिकृन्तति।
व्रजति+आशु जरां स्नेहः+ भुक्ते च+अनह्यते नरः॥40॥
शकृत्+पीडितम्+अन्नेन दुःखं शुष्कं चिरात्+सृजेत्।
सर्वधात्वावृते वायौ श्रोणिवङ्क्षणपृष्ठरुक्॥41॥
विलोमः+ मारुतः+अस्वस्थं हृदयं पीड्यते+अति च।
भ्रमः+ मूर्च्छा रुजा दाहः पित्तेन प्राणः+ आवृते॥42॥
विदग्धे+अन्ने च वमनम् उदाने+अपि भ्रमादयः।

दाहः+अन्तः+ऊर्जाभ्रंशः+च दाहः+ व्याने च सर्वगः॥43॥

क्लमः+अङ्गचेष्टासङ्गः+च ससन्तापः सवेदनः।

समानः+ ऊष्मोपहतिः+अतिस्वेदः+अरतिः सतृट्॥44॥

दाहः+च स्यात् अपाने तु मले हारिद्रवर्णता।

रजोतिवृत्तिः+तापः+च योनिमेहनपायुषु॥45॥

श्लेष्मणा तु+आवृते प्राणे सादः+तन्द्रा+अरुचिः+वमिः।

ष्ठीवनं क्षवथूद्गारनिःश्वासोच्छ्वाससङ्ग्रहः॥46॥

उदाने गुरुगात्रत्वम्+अरुचिः+वाक्स्वरग्रहः।

बलवर्णप्रणाशः+च व्याने पर्वास्थिवाग्ग्रहः॥47॥

गुरुता+अङ्गेषु सर्वेषु स्खलितं च गतौ भृशम्।

समाने+अतिहिमाङ्गत्वम्+अस्वेदः+ मन्दवह्निता॥48॥

अपाने सकफं मूत्रशकृतः स्यात्+प्रवर्तनम्।

इति द्वाविंशतिविधं वायोः+आवरणं विदुः॥49॥

प्राणादयः+तथा+अन्योन्यम्+आवृण्वन्ति यथाक्रमम्।

सर्वे+अपि विंशतिविधं विद्यात्+आवरणं च तत्॥50॥

निःश्वासोच्छ्वाससंरोधः प्रतिश्यायः शिरोग्रहः।

हृद्रोगः+ मुखशोषः+च प्राणेन+उदानः+ आवृते॥51॥

उदानेन+आवृते प्राणे वर्णौजोबलसङ्क्षयः।

दिशा+अनया च विभजेत्+सर्वमावरणं भिषक्॥52॥

स्थानानि+अवेक्ष्य वातानां वृद्धिं हानिं च कर्मणाम्।

प्राणादीनां च पञ्चानां मिश्रम्+आवरणं मिथः॥53॥

पित्तादिभिः+द्वादशभिः+मिश्राणां मिश्रितैः+च तैः।

मिश्रैः पित्तादिभिः+तद्वत्+मिश्रणाभिः+अनेकधा॥54॥

तारतम्यविकल्पात्+च याति+आवृतिरसङ्ख्यताम्।

तां लक्षयेत्+अवहितः+ यथास्वं लक्षणोदयात्॥55॥

शनैः शनैः+च+उपशयादत्+गूढाम्+अपि मुहुः+मुहुः।

विशेषात्+जीवितं प्राणः+ उदानः+ बलम्+उच्यते॥56॥

स्यात्+तयोः पीडनात्+हानिः+आयुषः+च बलस्य च।

आवृता वायवः+अज्ञाता ज्ञाता वा वत्सरं स्थिताः॥57॥

प्रयत्नेन+अपि दुःसाध्या भवेयुः+वा+अनुपक्रमाः।

विद्रधिप्लीहहृद्रोगगुल्माग्निसदनादयः॥58॥

भवन्ति+उपद्रवाः+तेषाम्+आवृतानाम्+उपेक्षणात्॥58 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां तृतीये निदानस्थाने वातशोणितनिदानं नाम षोडशः+अध्यायः॥16॥

समाप्तं चेदं तृतीयं निदानस्थानम्।